२५१२४ | वेद | २४

हेतरेयारायणम्,
१-५८
८४०,

३ | ✓

दे.ना. | कागज

ब.२ X ३

000641

ग.म. ५ / १२

Indira Gandhi National Centre for the Arts

पु० सं० ना० सं० ३१५२४

॥श्री॥ ॥अथ॥आरतिक्रप्रारंभ ॥

Indira Gandhi National Centre for the Arts

॥१॥

श्रीगणेशायनमः॥ॐ॥भूमिमुपस्पृशेदग्नइळानमइळानमऋषिभ्योमंत्रकृद्भ्योमंत्रपतिभ्योनमो
वोअस्तुदेवेभ्यः शिवानःशंतमाभवसुमृळीकासरस्वतिमातेव्योमसंदृशि॥भद्रंकर्णेभिःशृ
णुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः॥स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः॥शं
नइंद्राग्नीभवतामवोभिःशंनइंद्रावरुणारातहव्या॥शमिंद्रासोमासुवितायशंयोःशंनइंद्रापू
षणावाजसातौ॥स्तुषेजनंसुव्रतंनव्यसीभिर्गीर्भिर्मि सुम्नयंता॥तऽआगमंतुतइह
श्रुवंतुसुक्षत्रासोवरुणोमित्रोअग्निः॥कयानश्चित्रआभुवदूतीसदावृधःसखा॥कयाशचि
ष्ठयावृता॥कस्त्वासत्योमदानांमंहिष्ठोमत्सदंधसः॥दृळ्हाचिदारुजेवसु॥अभीषुणःसखी
नामविताजरितॄणां॥शतंभवास्यूतिभिः॥स्योनापृथिविभवानृक्षरानिवेशनी॥यच्छानःशर्
मसप्रथः॥उद्दितःशुक्रियंदधे।तमहेमात्मनिदधे॥अनुमामैत्विंद्रियंमयिश्रीर्मयियशः॥सर्वस्म
से१॥१॥

प्राणःसबलः॥उत्तिष्ठाम्यनुमास्त्रीः॥उत्तिष्ठंत्वनुमायंतुदेवताः॥अदब्धंचक्षुरिषितंमनः॥सूर्योज्यो
तिषांश्रेष्ठोदीक्षेमामाहिंसीः॥तच्चक्षुर्देवहितंशुक्रमुच्चरत्॥पश्येमशरदःशतंजीवेमश
रदःशतं॥त्वमग्नेव्रतपाअसिदेवआमर्त्येष्वा॥त्वंयज्ञेष्वीड्यः॥भद्रंनोअपिवातयमनः॥
ॐ॥शांतिः॥ॐनमोब्रह्मणेनमः॥ॐ॥अथमहाव्रतमिंद्रोवैवृत्रंहत्वामहानभवद्यन्महानभ
वत्तन्महाव्रतमभवत्तन्महाव्रतस्यमहाव्रतत्वंतदेतस्याह्नआज्यंकुर्यादितिहैकआहुरेकमितित्वे
वस्थितंप्रवोदेवायाग्नयइतिराद्धिकामोविशोविशोवोअतिथिमितिपुष्टिकामःपुष्टेर्वैविशःपुष्टि
मान्भवतीत्यतिथिमितिपदंभवतिनेतत्कुर्यादित्याहुरीश्वरोतिथिरेवचरितोस्ताहुहैस्माहकुर्यादेव रि३
योवैभवतियःश्रेष्ठतामश्नुतेसवाअतिथिर्भवतिनवाअसंतमातिथ्यायाद्रियंतेतस्मादुकाम
मेवैतत्कुर्यात्स्ययेतत्कुर्याद्गान्मवरुत्रहंतममित्येतत्तृचंप्रथमंकुर्यादेतद्वाअहरीसतः

Indira Gandhi National
Centre for the Arts

॥३॥

संवत्सरमासते तत्त्वा गच्छंति त एतेनुष्टुप्शीर्षाणस्त्रयस्तृचा भवंति ब्रह्म वै गायत्री वागनुष्टु
प्ब्रह्मणैव तद्वाचं संदधात्यग्नो ध्यग्निः समिधाजनानामिति कीर्तिकामो होतानिष्टुवीत
नं इति प्रजापशुकामः ॥१॥ अग्निर्नरो दीधितिभिररण्योरिसंनाघक्लामोऽग्निर्वा अन्नादः श्वि
रतरमिव वा इतरे धाज्येष्वग्निमागच्छत्यथेह मुखत एवाग्निमागच्छति मुखतो नाद्यं श्लुते मुखतः म ४
५ प पाप्मानमपघ्नते हस्तच्युती जनयंतेति जातवदेतस्माद्वा अन्नो यजमानो जायते तस्माज्जा
तवन्ति निचतुरश्च्छंदांसि भवंति चतुष्पादा वै पशवः पशूनामवरुध्येतानि त्रीणि छंदां
सि भवंति त्रयो वा इमे त्रिवृतो लोका एषामेव लोकानामभिजित्यै तेद्वे छंदसी भवतः प्रति
ष्ठाया एव द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमानमेव तद्द्विप्रतिष्ठं चतुष्पात्सु प
शुषु प्रतिष्ठापयति ताः परागवचनेन पंचविंशतिर्भवंति पंचविंशो यं पुरुषो दश हस्त्या अ

॥२॥

गुल्या दश पाद्या द्वावूरू द्वौ बाहू आत्मैव पंचविंशस्तमिममात्मानं पंचविंशं संस्कुरुते ऽथो पंचवि
शो वा एतदहः पंचविंश एतस्याह्नः स्तोमस्तत्समेन समं प्रतिपद्यते तस्माद्वे एव पंचविंशतिर्भवं
ति तासां त्रिः प्रथमया त्रिरुत्तमयैकया न त्रिंशन्न्यूनाक्षरा विराडेन्यूनेवैरेतः सिच्यते न्यूने प्राणा
न्यूनेनान्नाद्यं प्रतिष्ठितमेतेषां कामानामवरुध्या एतान्कामानवरुंधे य एवं वेद ता अभिसंप
द्यंते बृहतीं च विराजं च छंदो ये तस्याह्नः संपन्नाम घोऽनुष्टुभमनुष्टुबायतनानि ह्या न्या
नि ॥२॥ गायत्रं प्रउगं कुर्यादित्याहुस्तेजो वै ब्रह्मवर्चसं गायत्री तेजस्वी ब्रह्मवर्चसी भवतीत्यौ
ष्णिहं प्रउगं कुर्यादित्याहुरायुर्वा उष्णिगायुष्मान्भवतीत्यानुष्टुभं प्रउगं कुर्यादित्याहुः क्षत्रं वा अ
नुष्टुप्क्षत्रस्याप्त्या इति बार्हतं प्रउगं कुर्यादित्याहुः श्रीर्वै बृहती श्रीमान्भवतीति पांक्तं प्रउ
गं कुर्यादित्याहुरन्नं वै पंक्तिरन्नवान्भवतीति त्रैष्टुभं प्रउगं कुर्यादि त्याहुर्वीर्यं वै त्रिष्टुप्

Indira Gandhi National
Centre for the Arts

॥३॥ वीर्यवान्भवतीतिजागतंप्रउगंकुर्यादित्याहुर्जागतावैपशवःपशुमान्भवतीतितदुगायत्रमेवकु
र्याद्ब्रह्मवैगायत्रीब्रह्मैतदहर्ब्रह्मणैवतद्ब्रह्मप्रतिपद्यतेतदुमाधुच्छंदसंमधुहस्मवाऋषिभ्यो
मधुच्छंदाश्छंदतितन्मधुच्छंदसोमधुच्छंदस्त्वमन्नंवैमधुसर्वंवैमधुसर्वेवैकामामधुतद्य मा३
न्माधुच्छंदसंशंसतिसर्वेषांकामानामवरुद्ध्यैसर्वान्कामानवरुंधेयएवंवेदतदैकाहिकंरू
पंसमृद्धंबहुवाएतस्मिन्नहनिकिंचकिंचवारुणंक्रियतेशांत्याएवशांतिर्वैप्रतिष्ठैकाहःशांत्या ते५
मेवतत्प्रतिष्ठायामंततःप्रतितिष्ठतिप्रतितिष्ठतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसति॥३॥
वायवायाहिदर्शतेमेसोमाअरंकृताइत्येतद्वाअहरहर्यजमानायचदेवेभ्यश्चारंहास्माएत
दहर्भवतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतीन्द्रवायूइमेसुताआयातमुपनिष्कृतमि
तियद्वैनिष्कृतंतत्संस्कृतमाहास्येंद्रवायूसंस्कृतंगच्छतोयएवंवेदयेषांचैवंविद्वानेतद्धोता

३२

॥३॥

शंसतिमित्रंहुवेपूतदक्षंधियंघृताचींसाधंतेतिवाग्वैधीर्घृताचीवाचमेवास्मिंस्तद्दधातियएवं
वेदयेषांचैवंविद्वानेतद्धोताशंसत्यश्विनायज्वरीरिषइत्यन्नंवाइषोन्नाद्यस्यावरुद्ध्याआया
तंरुद्रवर्तनीइत्याहास्याश्विनौयज्ञंगच्छतोयएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतींद्राया
हिचित्रभानविंद्रायाहिधियेषितइंद्रायाहितूतुजानइत्यायाह्यायाहीतिशंसत्याहास्येंद्रो
ड्रो५ यज्ञंगच्छतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसत्योमासश्चर्षणीधृतोविश्वेदेवासआग
तेत्याहास्यविश्वेदेवाहवंगच्छंतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतिदाश्वांसोदाशुषः
सुतमितियदाहददुषोददुषःसुतमित्येवतदाहददतिहास्मैतंकामंदेवायत्कामएतच्छंसतिय
एवंवेदयेषांचैवंविद्वानेतद्धोताशंसतिपावकानःसरस्वतीयज्ञंवष्टुधियावसुरितिवाग्वै
धियावसुर्वाचमेवास्मिंस्तद्दधातियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतियज्ञंवष्टितिय

Indira Gandhi National
Centre for the Arts

॥५॥

दाहयज्ञंवहत्विस्येवतद्दाहताःपरागवचनेनैकविंशतिर्भवं[illegible]त्येकविंशोयंपुरुषोदशह
स्त्याअंगुलयोदशपाद्याआत्मैकविंशस्तमिममात्मानमेकविंशंसंस्कुरुतेताःस्त्रिःप्रथमया
त्रिरुत्तमयापंचविंशतिर्भवंतिपंचविंशआत्मापंचविंशःप्रजापतिर्दशहस्त्याअंगुलयो
दशपाद्याद्वाऊरूद्वौबाहूआत्मैवपंचविंशस्तमिममात्मानंपंचविंशंसंस्कुरुतेथोपंचवि
शंवाएतदहःपंचविंशएतस्यान्हस्तोमस्तत्समेनसमंप्रतिपद्यतेतस्मादेवपंचविंशति
र्भवंतिर्भवंति॥४॥इतिप्रथमोध्यायः॥आत्वारथंयथोतयइदेवसोसुतमधूइतिमरुत्वती
यस्यप्रतिपदनुचरावैकाहिकोरूपसम्रुद्धोबृहद्वाएतस्मिन्नहनिकिंचकिंचवारणंक्रि
यतेशांत्याएवशांतिर्वैप्रतिष्ठैकाहःशांत्यामेवतत्प्रतिष्ठायामंततःप्रतितिष्ठंतिप्रतितिष्ठ
तियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतीदन्वेदीयएहिहिप्रसूतिराशाचीभियेतऊ ॥५॥

श्री

श्चिनइत्युक्थंवाएतदहरुक्थवद्रूपसम्रुद्धमेतस्यान्होरूपंप्रैतु[illegible]ब्रह्मणस्पतिरक्षावीरमिति
वीरवद्रूपसम्रुद्धमेतस्यान्होरूपमुत्तिष्ठब्रह्मणस्पतेसुवीर्यमितिवीर्यवद्रूपसम्रुद्धमेतस्यान्हो
रूपंप्रनूनंब्रह्मणस्पतिर्मंत्रंवदत्युक्थ्यमित्युक्थंवाएतदहरुक्थवद्रूपसम्रुद्धमेतस्या
न्होरूपमग्निर्नेतासवृत्रहेतिवार्त्रघ्नमिंद्ररूपमे[illegible]द्धमेतदहरेतस्यान्होरूपंत्वंसोमक्रतु
भिःसुक्रतुर्भूस्त्वंवृषावृषत्वेभिर्महित्वेतिवृषण्वद्वाइंद्रस्यरूपमेंद्रमेतदहरेतस्यान्होरूपंपि
न्वंत्यपोसिनमिहेविनयंतिवाजिनमितिवाजिमद्वाइंद्रस्यरूपमेंद्रमेतदहरेतस्यान्होरू
पमथोउत्संदुहेतिस्तनयंतमक्षित[illegible]तित्स्तनयद्वाइंद्रस्यरूपमेंद्रमेतदहरेतस्यान्होरूपंप्र
वइंद्रायबृहतइतियद्बृहत्तन्महन्महद्रूपसम्रुद्धमेतस्यान्होरूपंबृहदिंद्रायगायतइ
तियद्बृहत्तन्महन्महद्रूपसम्रुद्धमेतस्यान्होरूपंनकिःसुदासोरथंपर्यासनरीरमदि

Indira Gandhi National Centre for the Arts

॥५॥

तिपर्यस्तवद्धंतिमद्रूपसमृद्धमेतस्यान्हो रूपं सुवोन्यगाथां छंसतिसर्वेषामन्हामास्त्यैसर्वेषामु
क्थानांसर्वेषांपृष्ठोनांसर्वेषांशास्त्राणांसर्वेषांप्रउगाणांसर्वेषांसवनानां॥५॥१॥ अ सत्समि
जरितः सामिवेगः सत्यद्भुतमितिशंसतिसत्यंवाएतदहः सत्यवद्रूपसमृद्धमेतस्यान्हो
रूपंतदुवासुक्तंब्रह्मवैवसुक्तोब्रह्मैतदहर्ब्रह्मणैवतद्ब्रह्मप्रतिपद्यतेतद्वाहुरथकस्माद्वा
सुक्तेणैतन्मरुत्वतीयंप्रतिपद्यतइतिनुहवाएतदन्यो वसुक्तान्मरुत्वतीयमुदयछंन
विव्याचेतितस्माद्वासुक्तेणैवैतन्मरुत्वतीयंप्रतिपद्यतेतदनिरुक्तंप्राजापत्यंशंसत्यनि
रुक्तोवैप्रजापतिःप्रजापतेराप्त्यैसहकेदिंद्रनिराहतेनेद्राद्रूपानप्रच्यवतेपिबासोममम
त २ भियमुग्रतर्दइतिशंसत्यूर्वंगव्यंमहिगृणानइंद्रेतिमहद्वद्रूपसमृद्धमेतस्यान्हो रूपंतदु
भारद्वाजंभरद्वाजोहवाऋषीणामनूचानतमोदीर्घजीवितमस्तपस्वितमआससएते

॥५॥

नसूक्तेनपाप्मानमपाहततद्भारद्वाजंशंसतिपाप्मनोपहत्याउअनूचानोदीर्घजीवीतपस्वीसा
नीतितस्माद्भारद्वाजंशंसतिकयाशुभासवयसः सनीळाइतिशंसत्याशासतेप्रतिहर्यत्यु
क्थेत्युक्थंवाएतदहरुक्थवद्रूपसमृद्धमेतस्यान्हो रूपंतदुकयाशुभीयमेतद्वैसंज्ञानंसांनिसू त ३
क्तंयत्कयाशुभीयमेतेनहवाइंद्रोगस्त्योमरुतस्तेसमजानततद्यत्कयाशुभीयंशंसतिसं
ज्ञात्योएवतदायुष्यंतद्योस्यप्रियःस्यात्कुर्यादेवास्यकयाशुभीयंमरुत्वांइंद्रवृषभोरणायेतिशं
सतींद्रवृषभइतिवृषण्वद्वाइदस्यरूपमेद्धमेतदहरेतस्यान्हो रूपंतदुवैश्वामित्रंविश्व
स्यहवैमित्रंविश्वामित्रआसविश्वंहास्मैमित्रंभवतियएवंवेदयेषांचैवंविद्वानेत
द्धोताशंसतिजनिष्ठाउग्रः सहसेतुरायेतिनिविद्धानमेकाहिकंरूपसमृद्धंवदुवा
एतस्मिंनहनिकिंचकिंचवारणंक्रियतेशांत्याएवशांतिवैप्रतिष्ठैकाहः शांत्यामेव

Indira Gandhi National
Centre for the Arts

॥६॥

तत्प्रतिष्ठायामंततः प्रतितिष्ठंति प्रतितिष्ठति य एवं वेद येषां चैवं विद्वान्होता शंसति ताः पू
राग्वचनेन सप्तनवतिर्भवंति सा या नवतिस्तिस्रस्तास्त्रिंशिन्यो विराजो धयाः सप्ताति
यंति ये वै षा प्रशंसा सास्य स्य तस्या एव तास्त्रिः प्रथमया त्रिरुत्तमयैकशतं भवंति पञ्चा
गुल्यश्चतुष्पर्वाद्दिक ह्मसीहोश्वाश्वश्वास फल्कं च सा पंचविंशतिः पंचविंशानीत
राणि स्यंगानि तच्छतमात्मैकशततमो यच्छतं तदायुरिंद्रियं वीर्यं तेजो यजमान एकशत
तम आयुषींद्रिये वीर्ये तेजसि प्रतिष्ठितस्तास्त्रिष्टुभं मभिसंपद्यंते त्रैष्टुभो हि मध्यंदिनः
॥२॥६॥ तदाहुः किं प्रेंखस्य प्रेंखत्वमित्ययं वै प्रेंखो योयं पवत एष ह्येषु लोकेषु प्रेंखत इति
तत्प्रेंखस्य प्रेंखत्वमेकफलकं स्यादित्याहुरेकधा ह्येवायं वायुः पवते तस्य रूपेणेति त
त्तन्नादृत्यं त्रीणि फलकानि स्युरित्याहुस्त्रयो वा इमे त्रिवृतो लोका एषां रूपेणेति तत्त ॥६॥

श्री

न्नादृत्यं द्वे एव स्यातां द्वौ वा इमौ लोकावाद्ध्यात्माविव द्ध्येते य उ एनेऽन्तरेणाकाशः सोंतरि
क्ष लोकस्तस्माद्द्वे एव स्यातामौदुंबरे स्यातामूर्ग्वा अन्नाद्यमुदुंबर ऊर्जोऽन्नाद्यस्यावरुध्यै
मध्यत उद्धृते स्यातां मध्यतो वै प्रजा अन्नं धिनोति मध्यत एव तदन्नाद्यस्य यजमानं दधा
त्युभय्यो रज्जवो भवंति दक्षिणाश्च सव्याश्च दक्षिणा वा एकेषां पशूनां रज्जवः सव्या एके
षां तदुभय्यो रज्जवो भवंत्युभयेषां पशूनामवरुध्यै दार्भ्यः स्युर्दर्भो वा ओषधीनामपहतपा
प्मा तस्माद्दार्भ्यः स्युः ॥३॥७॥ अरत्निमात्र उपरि भूमेः प्रेंखः स्यादित्याहुरेतावता वै स्वर्गा लोकाः
संमिता इति तत्तन्नादृत्यं प्रादेशमात्रे स्यादित्याहुरेतावता वै प्राणाः संमिता इति तत्तन्ना
दृत्यं मुष्टिमात्रे स्यादेतावता वै सर्वमन्नाद्यं क्रियत एतावता सर्वमन्नाद्यमभिपन्नं तस्मा
न्मुष्टिमात्र एव स्यात्युरस्तात्त्वयं च प्रेंखमधिरोहेदित्याहुरेतस्य रूपेण य एष तप

Indira Gandhi National Centre for the Arts

॥७॥

तिपुरस्ताद्ध्येषइमांल्लोकानभ्यस्युः धिरोहतीति तत्तंनादृत्यं तिर्यंचमधिरोहेदित्याहुस्तिर्यंचं
वाजचमधिरोहंतितेनोसर्वान्कामानवाप्नवामेति तत्तंनादृत्यमन्वंचमधिरोहेदित्याहु
रनूचीवैनावमधिरोहंतिनौर्वैषास्वर्गयाणीयस्वर्ग इति तस्मादन्वंचमेवाधिरोहेन्नब्बु
बुकेनोपस्पृशेन्नब्बुकोहैवंब्रह्मसमधिरोहति सउवयसामन्नादतमइति तस्मान्नब्बुबुके
नोपस्पृशेद्बाहुभ्यामधिरोहेदेवंह्येनोवयांस्यभिनिविशानएवंब्रह्मसउवयसांवीर्यवत्त
मइति तस्माद्बाहुभ्यामधिरोहेद्दस्येपादन्नाछिंधाने दस्येप्रतिष्ठायाउछिंघाइतिप्रेखंहो
ताधिरोहत्यौदुंबरीमासंदीमुद्गाता वृषावैप्रेखायोषासंदीतन्मिथुनंमिथुनमेवतदु
क्थमुखेकरोतिप्रजात्यैप्रजायतेप्रजयापशुभिर्यएववेदाथान्नैवप्रेखः श्रीरासंघं
नंचैवतच्छ्रियंचान्वधिरोहतो वृसीहोत्रकाः समाधिरोहंतिसब्रह्मकाःसमुत्सप्य ॥७॥

यमस्तमवरोहेदेषावाजप्रचितिर्यांपश्यतेकरोतितस्मात्तन्निरख्या ४

वाब्बृषधि वनस्पतयःफलंगृह्णंतिति तद्यदेतस्मिंन्नहनिसर्वशःसमधिरोहंतीषमेवतदूर्जम
न्नाद्यमधिरोहंत्यूर्जोन्नाद्यस्यावरुध्येवषट्कृत्यावरोहेदित्याहुस्तत्तंनादृत्यमकृ वावैसाप
चितिर्यामपश्यतेकरोतिनिगृह्यभक्षमवरोहेदित्याहुस्तत्तंनादृत्यमकृतावैसापचि
तिर्यामध्यस्थायकरोतिप्रतिख्यायैवभक्षमवरोहेत्स्वाउ वरोहेत्स्वाखेदेवरेतसप्रजायते
तस्मात्स्वाउ वरोहेद्द्वरोहेत् ॥४॥ ८॥ २ निश्रीहितो यो व्यायदः हिंकारेणेतदहःप्रविपद्यतेस्ता
उब्रह्मवैहिंकारोब्रह्मेतदहर्ब्रह्मणैवतद्ब्रह्मप्रतिपद्यतेयएवंवेदयदेवहिंकारेणप्रतिपद्य
ते ॥३॥ वृषावैहिंकारोयोषर्क्तन्मिथुनंमिथुनमेवतदुक्थमुखेकरोतिप्रजात्यैप्रजाय
तेप्रजयापशुभिर्यएववेदयद्देवहिंकारेणप्रतिपद्यते ३ ३ यथावाअन्निरेवंब्रह्मणोहिंका
रोयद्देकिंचाभ्रियाभिनित्वत्सस्य भ्येवैनन्नूणत्येवंयंकामंकामयतेहिंकारेणाभ्येवैन्न

Indira Gandhi National Centre for the Arts

॥८॥

त्वण॥ तिय एवं वेद य देवहिंकारेण प्रतिपद्यता ॥३३॥ वाचो वा एषा व्यावृत्तिर्दैव्यै च मानुष्यै च्चय
द्धिंकारः स यद्धिं कृत्य प्रतिपद्यते वाचमेव तद्व्यावर्त्तयति दैवीं च मानुषीं च ॥१४॥ तदाहुः केन
स्यान्हः प्रतिपदेति मनश्च वाक्चेति ब्रूयात् सर्वे ह्यस्मिन्कामाः श्रिताः सर्वान्न्या कामां दु
हे मनसि वै सर्वे कामाः श्रिता मनसा हि सर्वान्कामान्ध्यायति सर्वे हास्मिन्कामा श्रय
ते य एवं वेद वाग्वै सर्वान्कामां दुहे वाचा हि सर्वान्कामान्वदति सर्वान्हास्मै कामान्वा
ग्दुहे य एवं वेद तदाहुर्नैतदह ऋचा न यजुषा न साम्नार्त्या प्रत्यक्षात्प्रतिपद्येत न र्चा न
यजुषा न साम्न इयादिति तदेता एव व्याहृतीः पुरस्ताज्जपेद्भूर्भुवस्स्वरित्येता वाव
व्याहृतय इमे त्रयो वेदा भूरित्येव ऋग्वेदो भुव इति यजुर्वेदः स्वरिति सामवेदस्तेन
र्चा न यजुषा न साम्नार्त्या प्रत्यक्षात्प्रतिपद्यते न र्चा न यजुषा न साम्न एति ॥२॥१०॥

॥८॥

श्री

तदिति प्रतिपद्यते तदित्युदिति वा ओं नमन्त्रमेव तदभिप्रतिपद्यत एतां वाव प्रजापतिः प्रथमां वाचं व्या
हरदेकाक्षरां द्व्यक्षरां ततेति तातेति तथैवैतत्कुमारः प्रथमवादी वाचं व्याहरत्येकाक्षरां द्व्यक्षरां तते
ति तातेति तयैवैतत्तत्सा वाचा प्रतिपद्यते तदु ह ऋषिणाभ्युक्तं बृहस्पते प्रथमं वाचो अग्रमिति त
द्ध्येव प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधाना इति वाचा हि नामधेयानि धीयन्ते यदेषां श्रेष्ठ
यदरिप्रमासीदित्येतद्ध्येव श्रेष्ठमेतदरिप्रं प्रेणा तदेषां निहितं गुहाविरिति देवमु ह गुहाध्यात्म
मिमा देवता आविरधिदैवतमित्येतत्तदु ह ऋणं भवति ॥३॥११॥ तदिदास भुवनेषु ज्येष्ठमिति
प्रतिपद्यत एतद्वाव भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्ण इत्यतो ह्येष जात उग्रस्त्वेष
नृम्णः सद्यो जज्ञानो निरिणाति शत्रूनिति सद्यो ह्येष जातः पाप्मानमपाहतानु यं विश्वे म
दन्त्यूमा इति भूतानि वै विश्व ऊमास्त एनमनुमदन्ति तु देगादु दगादिति वा ऋ धानः शवसा नू

Indira Gandhi National
Centre for the Arts

र्योजा इत्येष वै वाचस्पतिर्नः शवसा भूर्योजाः शत्रुर्दसाय भिसं दधातीति सर्वं ह्येतस्माद्बिभाया
व्यनच्च व्यनच्च सस्नीति यच्च प्राणि यच्चाप्राणकमित्येवैतदाह सं ते नवन्त प्रभृता मदेष्विति त
वसर्ववशा इत्येवैतदाह त्वे क्रतुमपि वृञ्जन्ति विश्व इति त्वयीमानि सर्वाणि भूतानि सर्वाणि म
नांसि सर्वे क्रतवोऽपि वृञ्जन्तीत्येवैतदाह द्विर्यदेते त्रिर्भवन्त्यूमा इति द्वौ वै सन्तौ मिथुनौ प्रजायेते
प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेद स्वादोः स्वादीयः स्वादुना सृजा समिति मिथुनं
वै स्वादु प्रजा स्वादु मिथुनेनैवैतत्प्रजां संसृजत्यदः सु मधु मधुनाभियोधीरिति मिथुनं वै
मधु प्रजा मधु मिथुनेनैवैतत्प्रजामभियुध्यति तदृक्म ऋषिणा स्वो यत्तनूतन्वामैरयतेत्य
स्यै शारीर्या इमां छंदोमयीमित्येवैतदाहाधा तनूरेव तन्वोऽअस्तु भेषजमित्यस्यै शारी
र्या इयं छंदोमय्येत्येवैतदाह तस्यै यान्यष्टावक्षराणि सा गायत्री यान्येकादश सा त्रिष्टु ॥१॥



ब्यानि द्वादश सा जगत्यथ यानि दश सा विराड् दशिन्येषु छंदः सुप्रतिष्ठिता पुरुष इति त्र्यक्षरं सठवि
राज्येतानि वाव सर्वाणि छंदांसि यान्येतानि विराट् चतुर्थान्येवमु हैवैव विदुष एतदहः सर्वैः
छंदोभिः प्रतिपन्नं भवति ॥४॥१२॥ तानन्देन विहरति पुरुषो वै नन्दस्तस्मात्पुरुषो वदन्सर्वः सं
नदतीव नन्दं वज्रोदतीनामिति ३ आपो वा उक्ष्यो या दिव्यास्ता हीदं सर्वमुदन्त्यापो वा उद
स्योया मुख्यास्ता हीदं सर्वमनाघमुंदति नद्यो युवतीनामिति ॥३॥ आपो वाव या युवत्यो या अंत
रिक्ष्यास्ता हि पाप्लूयंत इवापो वाव योयुवत्यो याः स्वदंते ता हि सरीसृप्यंत इव पतिर्वो अघ्न्याना
मिति ३ आपो वा अघ्न्या या अग्नेर्धूमो जायत आपो वा अघ्न्या याः श्रान्तास्सृज्यन्ते धेनू
नामिषुध्यसीति ३ आपो वाव धेनवस्ता हीदं सर्वं धिन्वन्तीषुध्यसीति यदाह पतीयसीत्येवै
तदाह त्रिष्टुभं चानुष्टुभं च विहरति वृषा वै त्रिष्टुब्योषानुष्टुप्तन्मिथुनं तस्मादपि पुरुषो

Indira Gandhi National Centre for the Arts

१०

जायां वित्वा कृत्स्नतरमिवात्मानं मन्यते तास्त्रिः प्रथमया पंचविंशतिर्भवतीति पंचविंश आत्मा पंच
विंशः प्रजापतिर्द्दशहस्त्या अंगुल्यो दश पाद्या द्वा ऊरू द्वौ बाहू आत्मैव पंचविंशस्तमिम
मात्मानं पंचविंशं संस्कुरुते थो पंचविंशो वा एतदहः पंचविंश एतस्याह्नः स्तोमस्तत्समेन
समे प्रतिपद्यते तस्मादेव पंचविंशतिर्भवति ॥५॥१३॥ तादितिप्रतिपद्यते तत्वादिति वा अन्न
मंन्नमेव तदभिप्रतिपद्यत एतां वाव प्रजापतिः प्रथमां वाचं व्याहरदेकाक्षरां द्व्यक्षरां ततेति ता ह्र ५
तेति तथैवैतत्कुमारः प्रथमं वादी वाचं व्याहरत्येकाक्षरद्व्यक्षरां ततेति तातेति तयैव तत्तत्व
या वाचा प्रतिपद्यते तदुक्तमृषिणा बृहस्पते प्रथमं वाचो अग्रमित्येतद्ध्येव प्रथमं वाचो
अग्रं यत्प्रैरत नामधेयं दधाना इति वा चाहि नामधेयानि धीयंते यदेषां श्रेष्ठं यदरिप्रमा
सीदित्येतद्ध्येव श्रेष्ठमेतदरिप्रं प्रेणा तदेषां निहितं गुहाविरिती दमुह गुहा ह्यात्मन्निमा १०

देवता अदउ आविरधि दैवतमित्येतच्चतुरक्षं भवति ॥६॥१४॥ तदिदास भुवनेषु ज्येष्ठमिति प्रतिपद्यते
यद्वै ज्येष्ठं तन्महन्महद्रूपसमृद्धमेतस्याह्नो रूपं तां स्तुते की त्रिमघवन्महित्वेति महद्रूप
समृद्धमेतस्याह्नो रूपं भूय इद्वावृधे वीर्यायेति वीर्यवद्रूपसमृद्धमेतस्याह्नो रूपं न्यूंखा
मुत्वान्त तमंगीर्भिरुक्थैरित्युक्थं वा एतदहरुक्थवद्रूपसमृद्धमेतस्याह्नो रूपं न्यू
नाक्षरे प्रथमे पदे विहरति न्यूने वै रेतः सिच्यते न्यूने प्राणा न्यूनेन्नाद्यं प्रतिष्ठितमेते
षां कामानामवरुध्या एतान्कामानवरुंधे य एवं वेद द्वे दशाक्षरे भवत उभयोरन्नाद्यपो
रूपाद्यस्ये यद्यपदघ्यापादकमित्यष्टादशा अष्टादशाक्षराणि भवंति यानि दश नव प्राणा आ
त्मैव दशमः सात्मनः संस्कृतिरष्टावष्टा उद्यते भ्रुते यद्यत्कामयते य एवं वेद ॥७॥१५॥ ता
न देन विहरति प्राणो वै न दस्तस्मात्प्राणो न दन्सर्वः संनदती व न देव उदनीनामिती ३

Indira Gandhi National
Centre for the Arts

॥११॥ उष्णिगक्षरैर्भवत्यनुष्टुप्पादैरायुर्वा उष्णिग्वागनुष्टुप्तदस्मिन्नायुश्च वाचं च दधाति तास्त्रिः प्र
थमया पंचविंशतिर्भवंति पंचविंशो वा आत्मा पंचविंशः प्रजापतिर्दश हस्त्या अंगुलयो दश पा
द्या द्वा ऊरू द्वौ बाहू आत्मैव पंचविंशस्तमिममात्मानं पंचविंशं संस्कुरुतेथो पंचविंशो वा
एतदहः पंचविंश एतस्याह्नः स्तोमस्तत्समेन समं प्रतिपद्यते तस्माद्वेव पंचविंशतिर्भ
वंतीत्यध्यात्मं पंचविंशो थाधिदेवतं चक्षुः श्रोत्रं मनो वाक्प्राणस्ता एताः पंच देवता इमं
देवता ६ विष्टाः पुरुषं पंचो हैवैता अयं विष्टः पुरुषः सोत्र लोमभ्य आनखेभ्यः सर्वः सांग आ
प्यते तस्मात्सर्वाणि भूतान्यापिपीलिकाभ्य आत्मन्येव जायंते तदु हर्षिणा सहस्र
धा पंचदशान्युक्थानि पंच हि दश तानि भवंति यावद्द्यावापृथिवी तावदित्यादिति यावती वै
द्यावापृथिवी तावानात्मा सहस्रधा महिमानः सहस्रमित्युक्थान्येवैतदनुमदति महय ॥११॥

श्री

ति यावद्ध स्म विष्ठितं तावती वागिति यत्र ह क्व च ब्रह्म तद्वाग्यत्र वा वाक्तद्वा ब्रह्मेत्येतत्तदुक्तं भवत्ये
षां वा एषां सूक्तानां नवर्चं प्रथमं नव वै प्राणाः प्राणानां क्लृप्त्यै पंक्त्यर्चं भवति षडक्षरं तत्र तु
नामाह्येव पंचर्चं भवति पंचपदा पंक्तिः पांक्तो यज्ञो नेमन्नाद्यं स्यादवरुध्यै त्र्यृचं भवति त्रयो वा इमे
त्रिवृतो लोका एषामेव लोकानामभिजित्यै तानभिसंपद्यते बृहती छंदोमस्तं देवलोकमेव
आत्मैव मुहैवैवं विदे तयैव संपदाम्नतमेवात्मानमभिसंभवति स भवति ॥८।१६॥ [illegible]
[illegible] ॥ अथ यत्सूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वाणि संदधात्यथातो ग्रीवास्ताश्च हस्ते
यथा छंदसमुल्लिहः इत्यथ सूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वाणि संदधात्यथातः शि
रस्तद्वापंक्तीषु भवत्यग्नेर्वैकं दसा गायत्र्यग्नमं गानां शिरस्तदेकवतीषु भवत्यग्निर्वा
अर्कस्तान्नव भवंति नवकपालं वै शिरो दशमीं शंसति त्वक्केशा इत्येव सा भवत्यथो स्तो

Indira Gandhi National Centre for the Arts

॥१२॥ मातिशंसनायाप्रवतो त्रिवृत्स्तोमो भवति गायत्रं चछंद एतयोर्वै स्तोमछंदसोः प्रजातिमनु
सर्वमिदं प्रजायते यदिदं किंच प्रजायते प्रजायते प्रजया पशुभिर्य एवं वेदाथ सूददोहाः प्राणो वै
सूददोहाः प्राणेन पर्वाणि संदधात्यथातो विजवस्ताविराजो भवति तस्मात्पुरुषः पुरुषमा
हविवाउतस्मात्सुराजसिग्रीवा वै धारयसीति स्तभमानं वायद्वाउताः संवाल्हं नमाः सुत्यों
नतमाप्रस्यव्यते न्नंहि विराळ्जनमुवीर्यमथ सूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वाणि सं
दधाति ।१।१७। अथातो दक्षिणः पक्षः सोयं लोकः सोयमग्निः सो वाक्सद्रथंतरं सवसिष्ठ
स्तकं तता निषड्डीयाणि भवंति संपात एव कामानामभ्यास्त्यै प्रतिष्ठित्या अंनाद्याय पङ्क्ति
रथ सूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वाणि संदधात्यथात उत्तरः पक्षः सोसौ लोकः
सोसावादित्यस्तन्मनस्तद्बृहत्स भरद्वाजस्तकं तता निषड्डीयाणि भवंति संपात एव का ॥१२॥

श्री

मानामभ्यास्त्यै प्रतिष्ठित्या अंनाद्याय पङ्क्तिस्ताऊनातिरिक्तो भवतो वृषा वै बृहद्योषा रथंतरमतिरिक्तं
वै पुंसोन्यूनं स्त्रियै तस्मादूनातिरिक्तो भवतो थो एकेन हैव पत्रेण सुपर्णस्योत्तरः पक्षो ज्यायांस्त
स्मादेकयर्चोत्तरः पक्षो भूयान्भवत्यथ सूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वाणि संदधात्यथा
तः पुच्छं ता एकविंशतिर्द्विपदा भवंत्येकविंशतिर्हीमानि प्रत्यंचि सुपर्णस्य पत्राणि भवंत्यथो एकविंशो
वै स्तोमानां प्रतिष्ठा प्रतिष्ठा पुच्छं वयसां द्वाविंशीं शंसति प्रतिष्ठयोरेव तद्रूपं क्रियते तस्मात्सर्वाणिव
यांसि पुच्छेन प्रतितिष्ठंति पुच्छेनैव प्रतिष्ठायोस्तंति प्रतिष्ठा हि पुच्छं स एष द्वाभ्यां दशिनीभ्यां विराड्
भ्यामनयोर्द्वाविंश्योर्द्विपदयोरयं पुरुषः प्रतिष्ठितस्तस्य यत्सुपर्णरूपं तदस्य कामानामभ्यास्त्या अ
थ यत्पुरुषरूपं तदस्य श्रियै यशसेंनाद्याय पचित्या अथ सूददोहा अथ धाय्या अथ सूददोहाः प्र
णा वै सूददोहा योषा धाय्या तदुभयतः सूददोहसा धाय्यां परिशंसति तस्माद्योरेतः सिक्तं सदे

Indira Gandhi National Centre for the Arts

॥१३॥ कृतामेवाप्येति योषामेवाभ्युतआत्मा नाहि योषातः प्रजा नातस्मादेनामत्र शंसति॥२॥१८॥गाय
त्रीतृचाशीतिं शंसत्ययं वै लोको गायत्रीतृचाशीतिर्यदेवास्मिंल्लोके यशो यन्महो यन्मिथु
नं यदन्नाद्यं यापचितिस्तदश्नवै तदाप्नवानि। तदवरुणधै तन्मे सदिति स पसूददोहाः प्राणो
वै सूददोहाः प्राणेनेमल्लोकं संतनोति बार्हतीतृचाशीतिं शंसत्यंतरिक्षलोको वै बार्ह
तीतृचाशीतिर्यदेवांतरिक्षलोके यशो यन्महो यन्मिथुनं यदन्नाद्यं यापचितिस्तदश्नवै
तदाप्नवानि। तदवरुणधै तन्मे सदिति स थसूददोहाः प्राणो वै सूददोहाः प्राणेनांतरिक्षलो
कं संतनोत्यौष्णिहीतृचाशीतिं शंसत्यसौ वै लोको यौष्णिहीतृचाशीतिर्यदेवामुष्मिं
ल्लोके यशो यन्महो यन्मिथुनं यदन्नाद्यं यापचितिर्यदेवानां देवं तदश्नवै तदाप्नवानि।
तदवरुणधै तन्मे सदिति स थसूददोहाः प्राणो वै सूददोहाः प्राणेनामुं लोकं संतनोति सं ॥१३॥

तनोति॥३॥१९॥ इति चतुर्थोध्यायः॥ वशं शंसति वृत्रो मह इदं सर्वमसदिति ता एकविंशतिर्भवंत्येक
विंशतिर्हि ता अंतरुदरे विकृतयो थो एकविंशो वै स्तोमानां प्रतिष्ठा प्रतिष्ठोदरमन्नाद्यानां ता वि
कंदसो भवंति विहृतु इमि वबाञ्जनतस्य मणी यइव चस्कवीयइव च ताः प्रणावकंदस्कारं यथोप
पादं शंसति यथोपपादमिव वाञ्जनतस्य हसी यइव चडाघीयइव चाथ सूददोहाः प्राणो वै सूद
दोहाः प्राणेन पर्वाणि संधाति नामत्रो सृजति द्वादश कृत्वः शस्त्वा द्वादश विधा वा इमे प्राणाः
सप्त शीर्षण्या द्वौ स्तन्यौ त्रयोवांचो त्रवे प्राणा आप्यंते त्रसेस्क्रियते तस्मादेनामत्रोत्सृजती
द्राग्नीयुवं सुनइत्यैंद्राग्ना ऊरू तु वष्ठीवि प्रतिष्ठिताः षट्पदा भवंति प्रतिष्ठाया एव हि प्रतिष्ठो वै
पुरुषश्चतुष्पादाः पशवो यजमानमेव तद्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति द्विती
यासप्तपदा भवति ता गायत्री चानुष्टुभं च करोति ब्रह्म वै गायत्री वागनुष्टुप् ब्रह्मणैव तद्वा

Indira Gandhi National
Centre for the Arts

॥१४॥ वं संदधाति त्रिष्टुभमंततः शंसति वीर्यं वै त्रिष्टुप् वीर्येणैव तस्य भून्परिगृह्णाति तस्मात्स शंसतो वी
र्यमनूपतिष्ठत इयं तावेवाभ्युत्थानं च॥१।२०॥ प्रवो महे मंदमानायांधस इत्यैंद्रं निष्केवल्ये
निविदं दधाति प्रत्यक्षाद्ध्येव तदात्मन्वीर्यं धत्ते ता त्रिष्टुप्जगत्यो भवंतीति तदाहुर्यथ कस्मात्त्रिष्टु
प्जगतीषु निविदं दधातीति न ह वा एतस्यान्हः एकं छंदो निविदं धारयितुमर्हतीति तस्मात्त्रि
ष्टुप्जगतीषु निविदं दधातीति तदेतदाहुस्त्रिनिवित्कं विघाहुः शौनिविद्वाल्लखिल्या निविं नि
विदेव निविदेवमेन त्रिनिवित्कं विघाद्दथ सूक्तेवने नवायोन्य धायि चाकन्यो जात एव प्रथ
मो मनस्वानिति तयोरस्य नेसमस्य यदसेन्म नीषा इत्यं नाघस्यावरूध्या ॐ था व पन्नमे
ते अंतरे णैंद्रीणां दशातीनां त्रिष्टुप्जगतीनां बृहतीसंपन्नानां यावतीरावृपं ते तावंत्सूर्ध्व
मायुषो वर्षाणि जीवंत्येते नैहैवावपन्नेनायुराप्यते प्रज्ञा मे पशवो जयनि निति त्वे वेस ॥१४॥

जनीयमनुशंसति ताक्ष्यं शंसति स्वस्त्ययनं वै ताक्ष्यः स्वस्तिता यै स्वस्त्ययनमेव तत्कुरुते एकपदां शंसत्सेक
धेदं सर्वमसमानीमथो सर्वां छंदस्कृतिमाप्नवानीति इंदो वि श्वाजवीव धंनितिपदा तु षंगास्ताः समानुष
जति सर्वं वै शीर्षन्प्राणाः शीर्षन्नेव तत्प्राणान्दधात्यष्टमीन्नानुषजति वागष्टमीनेन्मे वाक्प्राणेर
नुषक्तासदिति तस्मादसावाक्समानाय तं नाप्राणेः सत्यनन्नुषक्ता विराजः शंसत्यन्नं वै विराजो
न्नाघस्यावरुध्येवासिष्ठेनपरिदधाति वसिष्ठासानीसेषस्तोमो महउग्राय बाहह इति महः इत्यारू
पसमृद्धया धुरीवात्योनवाजयन्न धायी त्यं तो वे धूरं तएतदहरे तस्यान्होरूपमिंद्रत्वायमर्के इ
देवसूनामित्यर्के वत्यारूपसमृद्धया दिवी व द्याम धिनः ओमतां धाइतियज्ञहक्रुच्वेब्लण्यो वा
गुघ्यते तऽज्ञास्येकीर्तिर्भवति यत्रैवं विद्वानेनया परिदधाति तस्माद्देवं विद्वानेतयैव परिदध्यात्
२।२१। ।तत्सवितुर्वृणीमहे द्यानो देवसवितरिति वैश्वदेवस्य प्रतिपदनुचरौ वैकाहिकौ रूप स

Indira Gandhi National
Centre for the Arts

स्त्रैत्रौ बहुवा एतस्मिन्नहनि किंच किंच वारुणं क्रियते शांत्या एव शांतिर्वै प्रतिष्ठैकाहः शांत्यामेव
तत्प्रतिष्ठायामंततः प्रतितिष्ठंति प्रतितिष्ठति य एवं वेद येषां चैवं विद्वानेतद्धोता शंसति तद्देवस्य स
वितुर्वार्यं महदिति सावित्रमंतो वै महदेतदेतद्ध रैतस्याह्नो रूपं कतरा पूर्वा कतरापरा योरिति
द्यावापृथिवीयं समानोदर्कं समानोदर्कं वा एतद्ध रैतस्याह्नो रूपमनश्वो जातो अनभीशु
रुक्थ्य इत्यार्भवं रथस्त्रिचक्र इति यदेतत्त्रिवदंतो वै त्रिवदेतदेतद्ध रैतस्याह्नो रूपमस्य वाम
स्य पलितस्य होतुरिति वैश्वदेवं बहुरूपं बहुरूपं वा एतद्ध रैतस्याह्नो रूपं गौरीर्मिमाय सलि
लानि तक्षतीत्येतदंतमानो भद्राः क्रतवो यंतु विश्वत इति वैश्वदेवं निविद्धानमेकाहिकं रूप
समृद्धं बहु वा एतस्मिन्नहनि किंच किंच वारुणं क्रियते शांत्या एव शांतिर्वै प्रतिष्ठैकाहः शांत्या
मेव तत्प्रतिष्ठायामंततः प्रतितिष्ठंति प्रतितिष्ठति य एवं वेद येषां चैवं विद्वानेतद्धोता शंसति वैश्वा ॥१५॥

श्रा १

६२

नरायधिषणाम्रुतावृध इत्याग्निमारुतस्य प्रतिपदंतो वै धिषणांतदेतद्ध रैतस्याह्नो रूपं प्रयज्यवो मरु
तो भ्राजदृष्टय इति मारुतं समानोदर्कं समानोदर्कं वा एतद्ध रैतस्याह्नो रूपं जातवेदसे सुनवाम
सोममिति जातवेदस्यां पुरस्तात्सूक्तस्य शंसति स्वस्त्ययनं वै जातवेदस्या स्वस्तितायै स्वस्त्यय न
मेव तत्कुरुत इमं स्तोममर्हते जातवेदस इति जातवेदस्यं समानोदर्कं समानोदर्कं वा एतद्ध रै
तस्याह्नो रूपमह्नो रूपं ॥३॥२२ इति पंचमोध्यायः ॥ प्रथमार्णिकं समाप्तं ॐ ॥ एष पंथा एतत्कर्मैतद्ब्रह्मै
तत्सत्यं तस्मान्न प्रमाद्येत्तन्नातीयान्नह्यत्यायन्पूर्वे येत्यायंस्ते पराबभूवुस्तदुक्तमृषिणा प्रजा ह ति
स्रो अत्यायमीयुर्न्यन्या अर्कमभितो विविश्र इति बृहद्ध तस्थौ भुवनेष्वंतः पवमानो हरित आविवेशे
ति प्रजा ह तिस्रो अत्यायमीयुरिति या वै ता इमाः प्रजास्तिस्रो अत्यायमायंस्तानीमानि वयांसि
वंगावगधाश्चेरपादा न्यन्या अर्कमभितो विविश्र इति ता इमाः प्रजा अर्कमभितो निविष्टा

Indira Gandhi National
Centre for the Arts

॥१६॥ प२

इममेवाग्निंब्रहदुतस्थोभुवनेष्वंतरिक्षद्दउएवब्रहन्भुवनेष्वंतरसावादित्यःपवमानोहरितआवि
वेशेतिवायुरेवपवमानोदिशोहरितआविष्टः॥१॥उक्थमुक्थमितिवैप्रजावदंतितदिदमेवोक्थमिय
मेवपृथिवीतोही दंसर्वमुत्तिष्ठतियदिदंकिंचतस्याग्निरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतेंत
रिक्षमेवोक्थमंतरिक्षंवाअनुपतंत्यंतरिक्षमनुधावयंतितस्यवायुरर्कोन्नमशीतयोन्नेनहीद
सर्वमश्नुतेसावेवद्यौरुक्थममुतःप्रदानाद्धीदंसर्वमुत्तिष्ठतियदिदंकिंचतस्यासावादित्यो
र्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतइत्यधिदैवतमथाध्यात्मंपुरुषएवोक्थमयमेवमहान्प्र
जापतिरहमुक्थमस्मीतिविद्यात्तस्यमुखमेवोक्थंयथापृथिवीतथातस्यवागर्कोन्नमशीतयो
न्नेनहीदंसर्वमश्नुतेनासिकेएवोक्थंयथांतरिक्षंतथातस्यप्राणोर्कोन्नमशीतयोन्नेनहीदंस
र्वमश्नुतेतदेतद्बुध्नस्यविष्टपंयदेतंनासिकायैविनतमिवललाटमेवोक्थंयथाद्यौस्तथात ॥१६॥

स्यचक्षुरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतेसमानमशीतयोध्यात्मंचाधिदैवतंचान्नमेवान्नेनही
मानिसर्वाणिभूतानिसमनंति॥३॥अन्नेनेमंलोकंजयत्यन्नेनामुंतस्मात्समानमशीतयोध्यात्मंचा
धिदैवतंचान्नमेवतदिदमन्नमन्नादमियमेवपृथिवीतोहीदंसर्वमुत्तिष्ठतियदिदंकिंचयद्धकिंचे
दंप्रेती३इ॥तद्दसौसर्वमत्तियद्धकिंचातःप्रेती३॥तदियंसर्वमत्तिसेयमित्थापाद्यताहवाआघो
भवतिनतस्येशेयंनाघाघर्हेननाजु॥२॥अथातोरेतसःसृष्टिःप्रजापतेरेतोदेवानांरेतो देवा ५
वर्षंवर्षस्यरेतओषधयओषधीनांरेतोन्नमन्नस्यरेतोरेतोरेतसोरेतःप्रजाःप्रजानांरेतो
हृदयंहृदयस्यरेतोमनोमनसोरेतोवाग्वाचोरेतःकर्मतदिदंकर्मकृतमयंपुरुषोब्रह्मणोलोकः
सइरामयोयद्धीरामयस्तस्माद्धिरण्मयोहिरण्मयोहवाअमुष्मिंल्लोकेसंभवतिहिरण्मयःसर्वे
भ्योभूतेभ्योददृशेयएवंवेद॥३॥तपपदाभ्यांप्रापद्यतब्रह्मेमंपुरुषंयत्प्रपदाभ्यांप्रापद्यतब्र

Indira Gandhi National Centre for the Arts

स्मेमंपुरुषंतस्मात्तपरेतस्मात्तपरइत्याचक्षतेशफाःखुराइत्यन्येषांपशूनांतदूर्ध्वमुदसर्पत्ताऊरू
अभवतामुरुमेमहीह्यब्रवीत्तदुदरमभवदुरुवैमेकुर्वितसेत्यब्रवीत्तदुरोऽभवदुदरंब्रह्मेतिशार्क
राक्ष्याउपासतेहृदयंब्रह्मेत्यारुणयोब्रह्माहैवता ३ इ । ऊर्ध्वंत्वेवोदसर्पत्तच्छिरोऽश्रयतयच्छिरो
ऽश्रयततच्छिरोऽभवत्तच्छिरसःशिरस्त्वं तदेताःशीर्षञ्छ्रियःश्रिताश्चक्षुःश्रोत्रंमनोवाक्प्राणःश्र
यन्तेऽस्मिञ्छ्रियोयएवमेतच्छिरसःशिरस्त्वंवेदताअहिंसन्ताहमुक्थमस्म्यहमुक्थमस्मीतितावब्रु
वन्हन्तास्माच्छरीरादुत्क्रामामतद्यस्मिन्नउत्क्रान्तइदंशरीरंपत्स्यतितदुक्थंभविष्यतीतिवागुद
६६ क्रामदवदन्नश्नन्पिबन्नास्तैवचक्षुरुदक्रामदपश्यन्नश्नन्पिबन्नास्तैवश्रोत्रमुदक्रामदशृ
ण्वन्नश्नन्पिबन्नास्तैवप्राणउदक्रामत्प्राणउत्क्रान्तेपद्यततदशीर्यताशारीती ३ ततच्छरीर
मभवत्तच्छरीरस्यशरीरत्वंशीर्यतेहवाअस्यद्विषन्पाप्माभ्रातृव्यःपरास्यद्विषन्पाप्मा ॥१७॥

मनउदक्रामन्मीलितइवाश्नन्पिबन्नास्तैव २

भ्रातृव्योभवतियएवंवेदताअहिंसन्तैवाहमुक्थमस्म्यहमुक्थमस्मीतितावब्रुवन्हन्तेदंपुनःशरीरंप्रविशाम
तद्यस्मिन्नःप्रपन्नइदंशरीरमुत्थास्यतितदुक्थंभविष्यतीतिवाक्प्राविशत्तदशयदेवचक्षुःप्राविशत्तदश
यदेवश्रोत्रंप्राविशत्तदशयदेवमनःप्राविशत्तदशयदेवप्राणःप्राविशत्तत्प्राणेप्रपन्नउदतिष्ठत्तदुक्थमभ
वत्तदेतदुक्थं ३ । प्राणएवप्राणउक्थमित्येवविद्यात्तंदेवाअब्रुवंस्त्वमुक्थमसित्वमिदंसर्वमसितवव
६५ यंस्मस्त्वमस्माकमसीतितदप्येतदृषिणोक्तंत्वमस्माकंतवस्मसीति ।४। तंदेवाःप्राणयन्तसप्राणीतःप्राता
यतःप्रातायीती ३ । तस्मात्तरभवत्समागादिती ३ तस्मायमभवदहरेवप्राणोरात्रिरपानोवागग्निश्च
क्षुरसावादित्यश्चन्द्रमामनोदिशःश्रोत्रंसएषप्रहितांसंयोगोध्यात्ममिमादेवताइदउक्थाविर
धिदैवतमित्येतन्नादुक्थंभवत्येतद्धस्मवैतद्विद्वान्हिहिरण्यदन्वैदोनतस्यैशोयंमत्यंनद्दशुरि
तिप्रहितांवाअहमध्यात्मसंयोगनिविष्टंवेदेतद्धतदनीशानानिहवाअस्मैभूतानिबलिं

Indira Gandhi National Centre for the Arts

॥१८॥

हरंतियएवंवेदतत्सत्यंसदितिप्राणस्तीत्यन्नंयमित्यसावादित्यस्तदेतत्त्रिवृत्त्रिवृदिववैचक्षुःशुक्लंकृष्णं
कनीनिकेतिसयदिहवाअपिमृषावदतिसत्यंहैवास्योदितंभवतियएवमेतत्सत्यस्यसत्यत्वंवेद
थास्यवाक्तिर्नामानिद्दामानितदस्यदेवाचातंत्यानामभिदामभिःसर्वंसितंसर्वंहीदन्नामनी२।
८ सर्ववाचाभिवदतिवहतिहवाएनंतांतिसंबद्धायैयएवंवेदतस्योह्निग्लोमानित्वग्गायत्रीत्रिष्टुम्मांस
मनुष्टुप्स्नावान्यस्थिजगतीपंक्तिर्मज्जाप्राणोबृहतीसछंदोभिश्छन्नोयछंदोभिश्छन्नःस्त
स्माछंदांसीत्याचक्षतेछादयंतिहवाएनंछंदांसिपापात्कर्मणोयस्यांकस्यांचिद्दिशिकामयतेय
एवमेतछंदसांछंदस्त्वंवेदतदुक्तमृषिणापश्यंगोपामित्येषवैगोपाएषहीदंसर्वंगोपायत्यनि
पद्यमानमितिनह्येषकदाचननसंविशत्याचपराचपथिभिश्चरंतमित्याचह्येषपराचपथि
भिश्चरतिससध्रीचीःसविषूचीर्वसानइतिसध्रीचीश्चह्येषविषूचीश्चवस्त्रइमाएवदि ॥१८॥

शआवरीवर्तिभुवनेष्वंतरित्येषह्यंतर्भुवनेष्वावरीवर्त्यथोअनाहतासोनतासोनक्तमिरितिसर्वंही
दंप्राणेनावृतंसोयमाकाशःप्राणेनबृहत्याविष्टब्धस्तद्यथायमाकाशःप्राणेनबृहत्याविष्टब्ध
एवंसर्वाणिभूतान्यापिपीलिकाभ्यःप्राणेनबृहत्याविष्टब्धानीत्येवंविद्यात् ॥९॥ अथातोवि
भूतयोस्यपुरुषस्यतस्यवाचास्यपृथिवीचाग्निश्चास्यामोषधयोजायंतेग्निरेनास्वदय
तीदमाहरतेदमाहरतेत्येवमेतौवाचंपितरंपरिचरतःपृथिवीचाग्निश्चयावद्दन्तुपृथिवीयावद्द
न्वग्निस्तावानस्यलोकोभवतिनास्यतावल्लोकोजीर्यतेयावदेतयोर्नजीर्यतेपृथिव्याश्चाग्नेश्च
यएवमेतावाचोविभूतिंवेदप्राणेनस्यष्टावंतरिक्षंचवायुश्चांतरिक्षंवाअनुचरंत्यंतरिक्ष
मनुशृण्वंतिवायुरस्मैपुण्यंगंधमावहत्येवमेतौप्राणंपितरंपरिचरतोंतरिक्षंचवायुश्च
यावद्दन्वंतरिक्षंयावद्दनुवायुःस्तावानस्यलोकोभवतिनास्यतावल्लोकोजीर्यतेया

Indira Gandhi National
Centre for the Arts

॥१९॥

वदेतयोर्नजीयेतेंतरिक्षस्यचवायोश्चयएवमेतांप्राणस्यविभूतिंवेद चक्षुषएष्टौद्यौश्चादित्य
श्चद्यौर्हास्मैवृष्टिमन्नाद्यंसंप्रयच्छत्यादित्योस्यज्योतिःप्रकाशंकरोत्येवमेतौचक्षुःपितरंप
रिचरतोद्यौश्चादित्यश्चयावदनुद्यौर्यावदन्वादित्यस्तावानस्यलोकोभवतिनास्यताव
ल्लोकोजीयतेयावदेतयोर्नजीयतेदिवश्चादित्यस्यचयएवमेतांचक्षुषोविभूतिंवेदश्रो
त्रस्यएष्टादिशश्चचंद्रमाश्चदिग्भ्योहैनमायतीःदिग्भ्योविशृणोतिचंद्रमाअस्मैपूर्व
पक्षापरपक्षौविचिनोतिपुण्यायकर्मणएवमेतेश्रोत्रंपितरंपरिचरंतिदिशश्चचंद्रमाश्च
यावदनुदिशोयावदनुचंद्रमास्तावानस्यलोकोभवतिनास्यतावल्लोकोजीयतेयाव
देतेषांनजीयतेदिशांचचंद्रमसश्चयएवमेतांश्रोत्रस्यविभूतिंवेदमनसएष्टाआप
श्चवरुणश्चापोहास्मैश्रद्धांसन्नमंतेपुण्यायकर्मणेवरुणोस्यप्रजांधर्मेणदाधारए ॥१९॥

वमेतेमनःपितरंपरिचरंत्यापश्चवरुणश्चयावदन्वापोयावदनुवरुणस्तावानस्यलोकोभव
तिनास्यतावल्लोकोजीयतेयावदेतेषांनजीयतेपांचवरुणस्यचयएवमेतांमनसोविभू
तिंवेद॥७॥अथापाः३इत्यापइतितदिदमापएवेदंवैमूलमेतस्तूलमयंपितैतेपुत्रायत्रहक्व

उ४

चपुत्रस्यतत्पितुर्यत्रवापितुस्तद्वापुत्रस्येत्येतत्तदुक्तंभवत्येतद्धस्मैवैतद्विद्वानाहमहिदासऐ
तरेयआहमादेवेभ्योवेदअहमेवान्वेतःप्रदानाह्येतइतःसंभृताइतिसएषगिरिश्चक्षु
श्रोत्रंमनोवाक्प्राणस्तंब्रह्मगिरिरित्याचक्षतेगिरतीहवैद्विषंतंपाप्मानंभ्रातृव्यंपरास्य
द्विषन्पाप्माभ्रातृव्योभवतियएवंवेदसएषोसुःसएषप्राणःसएषभूतिश्चाभूतिश्चतं
भूतिरितिदेवाउपासांचक्रिरेतेबभूवुस्तस्माद्धाप्येतर्हिसुप्तोभूर्भूरित्येवप्रश्वसित्य
भूतिरित्यसुरास्तेहपराबभूवुर्भवत्यात्मनापरास्यद्विषन्पाप्माभ्रातृव्योभवति

॥२०॥ यएवंवेदसएषमन्त्रःशुश्रेवामृतंचतदुक्तमृषिणापाङ्प्राङेतिस्वधयागृभीतइत्यपानेनह्य
ययतःप्राणोनपराङ्भवत्यमर्त्योमर्त्येनासयोनिरित्येतेहीदंसर्वंसयोनिमर्त्यानिही
मानिशरीराणी३अमृतातैषादेवताताशश्वन्ताविषूचीनावियन्तान्यन्यंचिक्युर्ननिचि
क्युरन्यमितिनिचिन्वन्तिहेवेमानिशरीराणी३अमृतातैवैषादेवतामृतोहवाअमुष्मिंल्लोकेस
भवत्यमृतःसर्वेभ्योभूतेभ्योददृशेयएवंवेदयएवंवेद॥८॥इतिप्रथमोध्यायः॥एषइमं
ल्लोकमभ्यार्चत्पुरुषरूपेणयएषतपतिप्राणोवावतदभ्यार्चत्प्राणोह्येषयएषतपतितंश
तंवर्षाण्यभ्यार्चत्तस्माच्छतंवर्षाणिपुरुषायुषोभवतितंयच्छतंवर्षाण्यभ्यार्चत्तस्माच्छत
र्चिनस्तस्माच्छतर्चिनइत्याचक्षतएतमेवसंतंसइदंसर्वंमध्यतोदधेयदिदंकिंचसय
दिदंसर्वंमध्यतोदधेयदिदंकिंचतस्मान्माध्यमास्तस्मान्माध्यमाइत्याचक्षतएत ॥२०॥

मेवसंतंप्राणोवैगृत्सोपानोमदःसयत्प्राणोगृत्सोपानोमदस्तस्माद्गृत्समदस्तस्माद्गृ
त्समदइत्याचक्षतएतमेवसंतंतस्येदंविश्वंमित्रमासीद्यदिदंकिंचतद्यदस्येदंविश्वंमि
त्रमासीद्यदिदंकिंचतस्माद्विश्वामित्रस्तस्माद्विश्वामित्रइत्याचक्षतएतमेवसंतंदेवाअ तं३
ब्रुवन्नयंवैनःसर्वेषांवामइतितंयद्देवाअब्रुवन्नयंवैनःसर्वेषांवामइतितस्माद्वामदेवस्त
स्माद्वामदेवइत्याचक्षतएतमेवसंतंसइदंसर्वंपाप्मनोत्रायतयदिदंकिंचसयदिदंसर्वं
पाप्मनोत्रायतयदिदंकिंचतस्मादत्रयस्तस्मादत्रयइत्याचक्षतएतमेवसंतं॥१॥
ए३ एषउवबिभ्रद्वाजःप्रजावैवाजस्ताएषबिभर्तियद्बिभर्तितस्माद्भरद्वाजस्तस्माद्भरद्वाजइ
साचक्षतएतमेवसंतंतंदेवाअब्रुवन्नयंवैनःसर्वेषांवसिष्ठइतितंयद्देवाअब्रुवन्नयंवै
नःसर्वेषांवसिष्ठइतितस्माद्वसिष्ठस्तस्माद्वसिष्ठइत्याचक्षतएतमेवसंतंसइदंस

Indira Gandhi National
Centre for the Arts

॥२१॥ र्वमभिप्रागाद्यदिदं किंच स यदिदं सर्वमभिप्रागाद्यदिदं किंच तस्मात्प्रगाथास्तस्मात्प्रगा
था इत्याचक्षत एतमेव संतं स इदं सर्वमभ्यपवयत यदिदं किंच स यदिदं सर्वमभ्यपवय
त यदिदं किंच तस्मात्पावमान्यस्तस्मात्पावमान्य इत्याचक्षत एतमेव संतं सोऽब्रवीदह
मिदं सर्वमसानि यच्च क्षुद्रं यच्च महदिति ते क्षुद्रसूक्ता अभवन्महासूक्ताश्च तस्मात्क्षु
द्रु५ द्रसूक्तास्तस्मात्क्षुद्रसूक्ता इत्याचक्षत एतमेव संतं सूक्तं बत नोऽवोचतेति तत्सूक्तमभव
त्तस्मात्सूक्तं तस्मात्सूक्तमित्याचक्षत एतमेव संतमेष वा ऋगेष ह्येभ्यः सर्वेभ्यो भू
तेभ्योऽर्चत स यदेभ्यः सर्वेभ्यो भूतेभ्योऽर्चत तस्मादृक्तस्मादृगित्याचक्षत एतमेव
संतमेष वा अर्द्धर्च एष ह्येभ्यः सर्वेभ्योऽर्द्धेभ्योऽर्चत स यदेभ्यः सर्वेभ्योऽर्द्धेभ्योऽर्चत
तस्मादर्द्धर्चस्तस्मादर्द्धर्च इत्याचक्षत एतमेव संतमेष वै पदमेष हीमानि सर्वाणि ॥२१॥

भूतानि पादि स यदिमानि सर्वाणि भूतानि पादि तस्मात्पदं तस्मात्पदमित्याचक्षत एतमेव सं
तमेष वा अक्षरमेष ह्येभ्यः सर्वेभ्यो भूतेभ्यः क्षरति न चैनमति क्षरति स यदेभ्यः सर्वेभ्यो भू
तेभ्यः क्षरति न चैनमति क्षरति तस्मादक्षरं तस्मादक्षरमित्याचक्षत एतमेव संतं ता वा ए
ताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात् ॥१०॥२॥
विश्वामित्रं ह्येतदहः शंसिष्यन्तमिन्द्र उपनिषसाद स हान्नमित्याभिव्याहृत्य बृहतीसहस्रं
शशंस तेनेन्द्रस्य प्रियं धामोपायात्तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागाः स वा ऋषे द्वि
तीयं शंसेति स हान्नमित्येवाभिव्याहृत्य बृहतीसहस्रं शशंस तेनेन्द्रस्य प्रियं धामोपाया
त्तमिन्द्र उवाच ऋषे प्रियं मे धामोपागाः स वा ऋषे तृतीयं शंसेति स हान्नमित्येवाभिव्याहृत्य
बृहतीसहस्रं शशंस तेनेन्द्रस्य प्रियं धामोपायात्तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागाः

वे२

Indira Gandhi National Centre for the Arts

॥२२॥ वरंतेददामीतिसहोवाचत्वामेवजानीयामितितमिंद्रउवाचप्राणोवाअहमस्म्यृषेप्राणस्त्वंप्रा
णःसर्वाणिभूतानिप्राणोह्येषयएषतपतिसएतेनरूपेणसर्वादिशोविष्टोस्मितस्यमेन्नं
मित्रंदक्षिणंतद्वैश्वामित्रमेषतपन्नेवास्मीतिहोवाच॥११॥३॥तद्वाइदंबृहतीसहस्रंसंप
न्नंतस्ययानिव्यंजनानितच्छरीरंयोघोषःसआत्मायऊष्माणःसप्राणएतद्धस्मवैतद्विद्वा
न्वसिष्ठोवसिष्ठोबभूवततएतंनामधेयंलेभएतदुहैवेंद्रोविश्वामित्रायप्रोवाचैतदुहैवें
द्रोभरद्वाजायप्रोवाचतस्मात्सतेनबंधुनायज्ञेषुहूयतेतद्वाइदंबृहतीसहस्रंसंपन्नं
तस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यषट्त्रिंशतमक्षराणांसहस्राणिभवंतितावं
तिशतसंवत्सरस्याह्नांसहस्राणिभवंतिव्यंजनैरेवरात्रीराप्नुवंतिस्वरैरहानितद्वाइ
दंबृहतीसहस्रंसंपन्नंतस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यपरस्तात्सं ज्ञामयोदे ॥२२॥

वतामयोब्रह्ममयोमृतमयःसंभूयदेवताअप्येतियएवंवेदतद्योहंसोसौयोसौसोहंतदुक्तमृषिणासूर्य
आत्माजगतस्तस्थुषश्चेत्येतदुहैवोपेक्षेतोपेक्षेत॥१२॥४॥योहवाआत्मानंपंचविधमुक्थंवेदयस्मादि
दंसर्वमुत्तिष्ठतिससंप्रतिवित्पृथिवीवायुराकाशआपोज्योतींषीत्येषवाआत्मोक्थंपंचविधमेत
स्माद्धीदंसर्वमुत्तिष्ठत्येतमेवाप्येत्यसयनंहवैसमानानांभवतियएवंवेदतस्मिन्योन्नंचान्नादंच
वेदाहास्मिन्नन्नादोजायतेभवत्यस्यान्नमापश्चपृथिवीचान्नमेतन्मयानिसन्नानिभवंतिज्यो
तिश्चवायुश्चान्नादमेताभ्यांहीदंसर्वमन्नमत्त्यावपनमाकाशआकाशेहीदंसर्वंसमोप्यतआव
पनंहवैसमानानांभवतियएवंवेदतस्मिन्योन्नंचान्नादंचवेदाहास्मिन्नन्नादोजायतेभवत्य
स्यान्नमोषधिवनस्पतयोन्नंप्राणभृतोन्नादमोषधिवनस्पतीन्हिप्राणभृतोदंतीतितेषांयउभयतो
दंताःपुरुषस्यानुविधांविहितास्तेन्नादाअन्नमितरेपशवस्तस्मात्तइतरानभ्यधीवचरंत्यधी

Indira Gandhi National
Centre for the Arts

॥२३॥ वत्यन्नेनाद्दो भवत्यथो वह समानानां ज्यायते य एवं वेद ॥१३॥ तस्य य आत्मानमाविस्तरां वेदाश्नुते ह
विर्भूय ओषधिवनस्पतयो यच्च किंच प्राणभृत्स आत्मानमाविस्तरां वेदौषधिवनस्पतिषु हि र
सो दृश्यते चित्तं प्राणभृत्सु प्राणभृत्सु त्वेवाविस्तरामात्मा तेषु हि रसोपि दृश्यते न चित्तमितरेषु पु
रुषे त्वेवाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद
लोकालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानं
न विज्ञातं वदंति न विज्ञातं पश्यंति न विदुः श्वस्तनं न लोकालोकौ त एतावंतो भवंति यथा
प्रज्ञं हि संभवाः ॥१४॥ स एष पुरुषः समुद्रः सर्वं लोकमति यद्ध किंचाश्नुतेत्येनं मन्यते यद्यंत
रिक्षलोकमश्नुतेत्येनं मन्यते यद्यमुं लोकमश्नुवीतात्येवैनं मन्येत स एष पुरुषः पंचविधस्तस्य
यदुष्णं तज्ज्योतिर्यानि खानि स आकाशोथ यल्लोहितं श्लेष्मा रेतस्ता आपो यच्छरीरं सा पृथिवी ॥२३॥

यः प्राणः स वायुः स एष वायुः पंचविधः प्राणोपानो व्यान उदानः समानस्ता एता देवताः प्राणापानयोरेव नि
विष्टाश्चक्षुः श्रोत्रं मनो वागिति प्राणस्य ह्यन्वायतमेता अपियंति स एष वाच श्चित्तस्योत्तरोत्तरिक्रमो
यद्यज्ञः स एष यज्ञः पंचविधोग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः स एष यज्ञाना
संपन्नतमो यत्सोम एतस्मिन्ह्येताः पंचविधा अधिगम्यंते यत्प्राक्सवनेभ्यस्तैकाविधात्रीणि स
वनानि यदूर्ध्वं सा पंचमी ॥१५॥३॥ यो ह वै यज्ञे यज्ञं वेदाहन्यहर्देवेषु देवमध्यूल्हं स संप्रति विदे
ष वै यज्ञे यज्ञो हन्यहर्देवेषु देवोध्यूल्हो यदेतन्महदुक्थं तदेतत्पंचविधं त्रिवृत्पंचदशौ सप्तदश
मेकविंशं पंचविंशमिति स्तोमतो गायत्रं रथंतरं बृहद्भद्रं राजनमिति सामतो गायत्र्युष्णिग्बृह
ती त्रिष्टुप् द्विपदेति छंदस्तः शिरो दक्षिणः पक्ष उत्तरः पक्षः पुच्छमात्मेत्याख्यानं पंचकृत्वः प्रस्तौ
ति पंचकृत्व उद्गायति पंचकृत्वः प्रतिहरति पंचकृत्व उपद्रवति पंचकृत्वो निधनमुपयंति तत्स्तो

Indira Gandhi National
Centre for the Arts

॥२४॥

त३

भसहस्रं भवत्येवं ह्येता: पंचविधाऽनुष्टुभः शस्यंते पञ्चाशीतिभ्य: सैकाविंशतिस्त्रस्तृचाशीत ख्या
योपङ्क्तिस्ता पंचमीतदेतत्सहस्रं तत्सर्वं तानि दशाद शेतिदेसर्वमेतावती हि संख्या दशदशातस्त
कृतं दशशतानि तत्सहस्रं सर्वं तानि त्रीणि छंदांसि भवंति त्रेधा विहितं वा इदमन्नमशनं पा
नं खादस्तदेतैराप्नोति ॥१६॥४॥ तद्वा इदं बृहती सहस्रं संपन्नं तद्धैतदेके नानाछंदसां सहस्रं प्र
तिजानते किमन्यत्सदन्यद्ब्रूयामेति त्रिष्टुप्सहस्रमेके जगतीसहस्रमेके नुष्टुप्सहस्रमेके
तदुक्तमृषिणानुष्टुभमनुचर्चूर्यमाणमिंद्रं निचिक्युः कवयो मनीषेति वाचि वै तदिंद्रं प्राणं न्य ह३
चायन्निसेत तदुक्तं भवति स हेश्वरो यशस्वी कल्याणकीर्तिर्भविता रीश्वरो तु पुरायुषः
प्रैतोरिति ह स्माह ह्रस्वो ह्येष आत्मा यद्वागभिहि प्राणेन मनसेज्यमानो वाचा नानुभवति
बृहतीमभिसंपादयेदेष वै कृत्स्न आत्मा यद्बृहती सोयमात्मा सर्वतः शरीरैः परिवृतः स्तद २४

---

धायमात्मा सर्वतः शरीरैः परिवृत एवमेव बृहती सर्वतश्छंदोभिः परिवृता मध्यं ह्येषामंगानामात्मा म
ध्यं छंदसां बृहती स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोरीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्मा
ह कृत्स्नो ह्येष आत्मा यद्बृहती तस्माद्बृहतीमेवाभिसंपादयेत् ॥१७॥५॥ तद्वा इदं बृहतीसहस्रं सं
पन्नं तस्य वा एतस्य बृहतीसहस्रस्य संपन्नस्यैकादशानुष्टुभो शतानि भवंति पंचविंशतिश्चा
नुष्टुभ आत्मवै भूयसा कनीयस्तदुक्तमृषिणा वाचमष्टापदीमहमिति सृष्टो हि चतुरक्षराणि भ
वंति नवस्रक्तिमिति बृहती संपद्यमाना नवस्रक्त्यृतस्पृशमिति सत्यं वै वागृचास्पृष्टेंद्रा
छ४ सरितन्वं ममृजे इति तद्यदेतद्बृहतीसहस्रमनुष्टुप्संपन्नं भवति तस्मात्तदेंद्राद्ब्राह्मणाद्ध हस्ते
वाच मनुष्टुभे तन्वं स निर्मिमीते स वा एष वाचः परमो विकारो यदेतन्महदुक्थं तदेतत्पंच
विधं मितममितं स्वरः सत्यानृते इत्यृग्गाथाकुंब्या तन्मितं यजुर्निगदो वृथा वाक्तदमि
तं सामाथो यः कश्च गेष्णः स स्वर ओमिति सत्यं नेत्यनृतं तदेतत्पुष्पं फलं वाचो यत्सत्यं स हे

Indira Gandhi National
Centre for the Arts

३१५२४

वरोय शास्वीक ऽ्याणक्रीर्निर्भवितोः पुष्पंहि फलंवाचः सत्यंवदत्यथैतन्मूलंवा वोयदनृतंतं
यथा वृक्षआविर्मूलः शुष्यति स उद्वर्तत एवमेवानृतंवदन्नाविर्मूलमात्मानं करोति स शु
ष्यति स उद्वर्तते तस्मादनृतन्नवदेद्दयेत त्वेनेन पराग्वा एतद्रिक्तमक्षरं यदेतदो ३ मिति
तद्यत्किंचोमित्याहात्रैवास्मै तद्रिच्यते स यत्सर्वमों कुर्याद्रिच्यादात्मानं स कामेभ्यो ना
लं स्यादथैतत्पूर्णमभ्यात्मं यन्नेति स यत्सर्वं नेति ब्रूयात्पापिकास्य कीर्तिर्जायेत सैनं
तत्रैव हन्यात्तस्मात्काल एव दद्यात्काले न दद्यात्तत्सत्यानृते मिथुनी करोति तयोर्मिथु
नात्प्रजायते भूयान्भवति यो वै तां वाचं वेद यस्या एष विकारः स संप्रतिविद् कारो वै स
र्वा वाक्सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति तस्यै यदुपांशु स प्राणो
ऽथ यदुच्चैस्तच्छरीरं तस्मात्तदाविराविर्हि शरीरं ॥१८६॥ तद्धाइदं ब्रूहतीसहस्रं संप ॥२५॥

तस्मात्तत्तिरइवतिर इवह्यशरीरमशरीरो हि प्राणोऽथ यदुच्चैस्तच्छरीरं १

नेतद्यशः स इन्द्रः स भूतानामधिपतिः स य एवमेतमिंद्रं भूतानामधिपतिं वेद विस्त्रसा हैवा
स्माल्लोकात्प्रैतीति ह स्माह महिदास ऐतरेयः प्रेत्येंद्रो भूत्वैषु लोकेषु राजतीति तद्धाहयदनेने
न रूपेणामुं लोकमभिसंभवती ३ अथ केन रूपेणमं लोकमाभवती ३ इति तद्यदेतत्स्त्रियां लो
हितं भवत्यग्नेस्तद्रूपं तस्मात्तस्मान्न बीभत्सेताथ यदेतत्पुरुषे रेतो भवत्यादित्यस्य तद्रू
पं तस्मात्तस्मान्न बीभत्सेत सोयमात्मेमममात्मानममुष्मा आत्मने संप्रयच्छत्यसावा
त्मामुमात्मानमिमस्मा आत्मने संप्रयच्छति तावन्योन्यमभिसंभवतो नेनाह रूपेणामुं
लोकमभिसंभवत्यमुनो रूपेणमं लोकमाभवति ॥१९॥७॥ तत्रैते श्लोकाः ३ यदक्षरं प
ञ्चविधं समेति युजो युक्ता अभि यत्संवहंति सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः
सर्व एकं भवंति यदक्षरादक्षरमेति युक्ते युजो युक्ता अभि यत्संवहंति स त्यस्य सत्य
मनु यत्र युज्यते तत्र देवाः सर्व एकं भवंति यद्वाचो [illegible]मितियच्चनेति यच्चास्याः क्रूरं यदु

॥२६॥

योक्षणि सुनात्रियमाकृ वयो अन्वविंदन्नामायत्तासमत्यं यच्छतेधिं यस्मिन्नामासमत्यं यच्छते
धितत्र देवाः सर्वं एकं भवंति तेन पाप्मानमपहत्य ब्रह्मणा स्वर्गं लोकमप्येति विद्वान्ने
न वाचा स्त्रियं ब्रुवेनैनमस्त्रीपुमान्ब्रुवन्न पुमांसं नेत्रुवेनेन वदन्न वदति कश्चनाऽऽ: इति ब्र
लतत्रागात महीमिति तद्वा इदं बृहतीसहस्रं संपन्नं तस्यै एतस्य बृहतीसहस्रस्य संपन्नस्य वा ४
षट्त्रिंशतमक्षराणां सहस्राणि भवंति तावंति पुरुषायुषोऽह्नां सहस्राणि भवंति जीवाक्षरेणै
व जीवाहराप्नोति जीवाह्ना जीवाक्षरमित्यन कामममारोथदेवरथस्तस्य वागुद्धिः श्रोत्रे पक्ष
सी चक्षुषी युक्ते मनः संग्रहीता तदयं प्राणोधितिष्ठति तदुक्तमृषिणा तेन यातं मनसो ज
वीयसा निमिषश्चिज्जवीयसेति जवीयसेति ॥२०८॥ इति त्रितीयोऽध्यायः ॥ आत्मा वा इ
दमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नुसृजा इति स इमाँल्लोका ॥२६॥

६१

नसृजतांभो मरीचीर्मरमापोदोंभः परेण दिवं द्यौः प्रतिष्ठांतरिक्षं मरीचयः पृथिवी मरो या अधस्ता
त्ता आपः स ईक्षतेमेनु लोका लोकपालान्नु सृजा इति सोद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत्तमभ्य
तपत्तस्याभितप्तस्य मुखं निरभिद्यत यथांडं मुखाद्वाग्वाचोग्निर्नासिके निरभिद्येतां नासि
काभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतामक्षीभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां
कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं नि ६५
रभिद्यत हृदयान्मनो मनसश्चंद्रमा नाभिर्निरभिद्यत नाभ्या अपानो पानान्मृत्युः शिश्नं
निरभिद्यत शिश्नाद्रेतो रेतस आपः ॥२१॥१॥ ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्राप
तंस्तमशनापिपासाभ्यामन्ववार्जत्ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन्प्रतिष्ठि
ता अन्नमदामेति ताभ्यो गामानयत्ता अब्रुवन्न वै नोयमलमिति ताभ्योश्वमानयत्ता अ

Indira Gandhi National Centre for the Arts

ब्रुवन्नवैनोयमलमितिताभ्यःपुरुषमानयत्ताअब्रुवन्त्सुकृतंबतेतिपुरुषोवावसुकृतंताअ
ब्रवीद्यथायतनंप्रविशतेत्यग्निर्वाग्भूत्वामुखंप्राविशद्वायुःप्राणोभूत्वानासिकेप्राविश
दादित्यश्चक्षुर्भूत्वाक्षिणीप्राविशद्दिशःश्रोत्रंभूत्वाकर्णौप्राविशन्नोषधिवनस्पतयो
लोमानिभूत्वात्वचंप्राविशंश्चंद्रमामनोभूत्वाहृदयंप्राविशन्मृत्युरपानोभूत्वाना
भिंप्राविशदापोरेतोभूत्वाशिश्नंप्राविशंस्तमशनापिपासेअब्रूतामावाभ्यामभिप्र
जानीहीतितेअब्रवीदेतास्वेववान्देवतास्वाभजाम्येतासुभागिन्यौकरोमीतितस्माद्य
स्यैकस्यैचदेवतायैहविर्गृह्यतेभागिन्यावेवास्यामशनापिपासेभवतः॥२॥२॥सईक्ष
तेमेनुलोकाश्चलोकपालाश्चान्नमेभ्यःसृजाइतिसोपोभ्यतपत्ताभ्योभितप्ताभ्यो
मूर्तिरजायतयावैसामूर्तिरजायतान्नंवैतत्तदेनत्सृष्टंपराङ्त्यजिघांसत्तद्वाचाजि



घृक्षत्तन्नाशक्नोद्वाचाग्रहीतुंसयद्धैनद्वाचाग्रहैष्यदभिव्याहृत्यहैवान्नमत्रप्स्यत्तत्प्राणेनाजिघृ
क्षत्तन्नाशक्नोत्प्राणेनग्रहीतुंसयद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्यहैवान्नमत्रप्स्यत्तच्चक्षु
षाजिघृक्षत्तन्नाशक्नोच्चक्षुषाग्रहीतुंसयद्धैनच्चक्षुषाग्रहैष्यद्दृष्ट्वाहैवान्नमत्रप्स्यत्तच्छ्रो
त्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेणग्रहीतुंसयद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वाहैवान्नमत्रप्स्यत्तत्त्व
चाजिघृक्षत्तन्नाशक्नोत्त्वचाग्रहीतुंसयद्धैनत्त्वचाग्रहैष्यत्स्पृष्ट्वाहैवान्नमत्रप्स्यत्तन्म
नसाजिघृक्षत्तन्नाशक्नोन्मनसाग्रहीतुंसयद्धैनन्मनसाग्रहैष्यद्ध्यात्वाहैवान्नमत्रप्स्य
त्तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेनग्रहीतुंसयद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्यहैवान्न
मत्रप्स्यत्तदपानेनाजिघृक्षत्तदावयत्सैषोन्नस्यग्रहोयद्वायुरन्नायुर्वाएषयद्वायुःस
ईक्षतेकथंन्विदंमदृतेस्यादितिसईक्षतकतरेणप्रपद्याइतिसईक्षतयदिवाचाभि

Indira Gandhi National Centre for the Arts

॥२८॥

व्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं
यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोहमिति स एतमेव सीमानं विदार्यैतया द्वा
रा प्रापद्यत सैषा विदृतिर्नाम द्वास्तदेतन्नांदनं तस्य त्रय आवसथास्त्रय स्वप्ना अयमावसथो
यमावसथो यमावसथ इति स जातो भूतान्यभिव्यैख्यत्किमि हान्यं वावदिषदिति स ए
तमेव पुरुषं ब्रह्म ततमम पश्यदिदमदर्शमिती ३ तस्मादिदंद्रो नामेदंद्रो ह वै नाम तमि
दंद्रं संतमिंद्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः ॥२३॥
॥३॥ इति चतुर्थोध्यायः ॥ ॥ अपक्रामंतु गर्भिण्यः ॥ पुरुषे ह वा अयमादितो गर्भो भव
ति यदेतद्रेतस्तदेतत्सर्वेभ्योंगेभ्यस्तेजः संभूतमात्मन्येवात्मानं बिभर्ति तद्यदा स्त्रि
यां सिंचत्यथैनज्जनयति तदस्य प्रथमं जन्म तत्स्त्रिया आत्मभूयं गच्छति यथा स्वमं ॥२८॥

गं तथा तस्मादेनां न हिनस्ति सास्यैतमात्मानमत्र गतं भावयति सा भावयित्री भावयितव्या भवति
तं स्त्री गर्भं बिभर्ति सो ग्र एव कुमारं जन्मनो ग्रेधिभावयति स यत्कुमारं जन्मनो ग्रेधिभा
वयत्यात्मानमेव तद्भावयत्येषां लोकानां संतत्या एवं संतता हीमे लोकास्तदस्य द्वितीयं ज
न्म सोस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते थास्यायमितर आत्मा कृत्सो वयोग इत४
तः प्रैति स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म तदुक्तमृषिणा गर्भे नु सन्न
न्वेषामवेदमहं देवानां जनिमानि विश्वा । शतं मा पुर आयसीररक्षन्नधः श्येनो जव
मि२ सा निरदीयमिति गर्भ एवैतच्छयानो वामदेव एवमुवाच स एवं विद्वानस्माच्छरीरभेदा
दूर्ध्व उत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वामृतः समभवत्समभवत् ॥२४॥
॥५॥ इति पंचमोध्यायः ॥ यथास्थानं गर्भिण्यः ॥ कोयमात्मेति वयमुपास्महे कतरः स आ

Indira Gandhi National Centre for the Arts

त्मा येन वा पश्यति येन वा शृणोति येन वा गंधानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वा
दु चास्वादु च विजानाति यदेतद्हृदयं मनश्चैतत्संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा
दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैता
नि प्रज्ञानस्य नामधेयानि भवंत्येष ब्रह्मैष इंद्र एष प्रजापतिरेते सर्वे देवा इमानि च पंच
महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव बीजा
नीतराणि चेतराणि चांडजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः
पुरुषा हस्तिनो यत्किंचेदं प्राणि जंगमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञा
ने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म स एतेन प्रज्ञेनात्मनास्माल्लो
कादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वामृतः समभवत्समभवत्॥२५॥६॥ इति ष

व १



ष्ठोऽध्यायः॥ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि। वेदस्य म आणीस्थः
श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामं
वतु ३ वतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारं॥२६॥७॥ सप्तमोऽध्यायः॥ इति द्वितीयारण्यकं
समाप्तं॥ ॐ॥ अथातः संहिताया उपनिषत्पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति
मांडूकेय आकाशः संहितेत्यस्य माक्षव्यो वेदयांचक्रे स हाविपरिहृतो मेने न मेऽस्य पुत्रे
ण समगादिति समानं वेत संपरिहृतो मेन इत्यागस्त्यः समानं ह्येतद्भवति वायुश्चाकाश
वा३ श्चेत्यधिदेवतमथाध्यात्मं वाक्पूर्वरूपं मन उत्तररूपं प्राणः संहितेति शूरवीरो मांडूकेयो
थ हास्य पुत्र आह ज्येष्ठो मनः पूर्वरूपं वागुत्तररूपं मनसा वा अग्रे संकल्पयत्यथ
वाचा व्याहरेतितस्मान्मन एव पूर्वरूपं वागुत्तररूपं प्राण स्त्वेव संहितेति समानं मेने योरत्र

Indira Gandhi National
Centre for the Arts

॥३०॥ पितुश्च पुत्रस्य च स एषोऽश्वरथः प्रष्टिवाहनो मनो वाक्प्राण संहतः स य एवमेतां संहितां वेद
संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति नु माण्डूके
यानां ॥१॥ अथ शाकल्यस्य पृथिवी पूर्वरूपं द्यौरुत्तररूपं वृष्टिः संधिः पर्जन्यः संधा
रू ४ नातद्दुतापि यत्रैतद्बलवदनूदृन्सदृधदहोरात्रे वर्षति द्यावापृथिव्यौ समधातामित्यु
ताथो ह रितीन्च धिदैवतमथाध्यात्मं पुरुषो ह वा अयं सर्व ओ दंदे बिदले भवत इ
त्याहुस्तस्येदमेव पृथिव्या रूपमिदं दिवस्तत्रायमंतरेणाकाशो यथासौ द्यावापृथि
व्यावंतरेणाकाशस्तस्मिन्हास्मिन्नाकाशे प्राण आयत्तो यथामुष्मिन्नाकाशे वायुराय
त्तो यथामूनि त्रीणि ज्योतींष्येवमिमानि पुरुषे त्रीणि ज्योतींषि यथासौ दिव्यादित्य एव
मिदं शिरसि चक्षुर्यथासावंतरिक्षे विद्युदेवमिदमात्मनि हृदयं यथायमग्निः पृथि

पु १ ॥३०॥

व्यामेवमिदमुपस्थे रेत एवमु ह स्म सर्वल्लोकमात्मानमनु विधायाहेदमेव पृथिव्या रूपमि
दं दिवः स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्व
र्गेण लोकेन सर्वमायुरेति ॥२॥ अथातो निर्भुजप्रवादाः पृथिव्यायतनं निर्भुजं दिव्या
यतनं प्रतृण्णमंतरिक्षायतनमुभयमंतरेणाथ यद्येनं निर्भुजं ब्रुवंतमुपवदेदश्यौष्ठावराभ्यां ॐ ४
स्थानाभ्यामित्येनं ब्रूयादथ यद्येनं प्रतृण्णं ब्रुवंतमुपवदेदश्यौष्ठाउत्तराभ्यां स्थाना
भ्यामित्येनं ब्रूयादथ यस्त्वेवोभयमंतरेणाह तस्य नास्त्युपवादो यद्धि संधिं विवर्तयति त
न्निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे अभिव्याहरति तत्प्रतृण्णस्याग्र उ एवोभयमंतरे
णोभयं व्याप्तं भवत्यन्नाद्यकामो निर्भुजं ब्रूयात्स्वर्गकामः प्रतृण्णमुभयकाम उभय
मंतरेणाथ यद्येनं निर्भुजं ब्रुवंतं पर उपवदेत्पृथिवी देवतामारः पृथिवी त्वा देवता

Indira Gandhi National Centre for the Arts

॥३२॥ रिष्यतीत्येनंब्रूयादथय एनंपृथिवीमब्रुवंतंपरउपवदेद्दिवंदेवतामारो द्यौस्त्वा देवतारिष्यती
त्येनंब्रूयादथय एनमुभयमंतरेणाब्रुवंतंपरउपवदेदंतरिक्षंदेवतामारोंतरिक्षंत्वादेव
तारिष्यतीत्येनंब्रूयाद्यथा तुकथा चाब्रुवन्वाब्रुवन्वाब्रूयादभ्याशमेवयत्तथास्यान्नत्वे
वान्यत्कुशलाद्ब्राह्मणंब्रूयादितिद्युम्न एवब्राह्मणंब्रूयान्नेतिद्युम्नश्चनब्राह्मणंब्रूयान्नमो
अस्तुब्राह्मणेभ्यइतिहस्माहशूरवीरोमाण्डूकेयः॥३॥अथातोनुव्याहाराःप्राणोवंशइतिवि
द्यात्सय एनंप्राणंवंशमुपवदेच्छक्नुवंचेन्मन्येतप्राणंवंशंसमधाः॥३॥प्राणमावंशंसंदधतंन
शक्नोषीत्याहप्राणस्त्वावंशोहास्यतीत्येनंब्रूयादथचेदशक्नुवंतंमन्येतप्राणंवंशंसमधि
त्सिषंतंनाशकःसयातुप्राणस्त्वावंशोहास्यतीत्येनंब्रूयाद्यथातुकथाचाब्रुवन्वाब्रुवन्वाब्रू
यादभ्याशमेवयत्तथास्यान्नत्वेवान्यत्कुशलाद्ब्राह्मणंब्रूयादितिद्युम्नएवब्राह्मणंब्रूया ॥३२॥

न्नेतिद्युम्नश्चनब्राह्मणंब्रूयान्नमोअस्तुब्राह्मणेभ्यइतिहस्माहशूरवीरोमाण्डूकेयः॥४॥अथ
खल्वाहनिर्भुजवक्त्राःपूर्वमक्षरंपूर्वरूपमुत्तरमुत्तररूपंयोवकाशःपूर्वरूपोत्तररूपे
अंतरेणसासंहितेतिसय एवमेतांसंहितांवेद संधीयतेप्रजयापशुभिर्यशसाब्रह्म
वर्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथवयंब्रूमोनिर्भुजवक्त्राइतिहस्माहह्रस्वो
माण्डूकेयःपूर्वमेवाक्षरंपूर्वरूपमुत्तरमुत्तररूपंयोवकाशःपूर्वरूपोत्तररूपेअं
तरेणयेनसंधिंविवर्तयतियेनस्वरास्वरंविजानातियेनमात्रामात्रांविभजतेसा
संहितेतिसय एवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्व
र्गेणलोकेनसर्वमायुरेत्यथहास्यपुत्रआहमध्यमःप्रातीबोधीपुत्रोक्षरेखल्वि
मेअविकर्षन्ननेकीकुर्वन्यथावर्णमाहतद्यासौमात्रापूर्वरूपोत्तररूपेअंतरेण

Indira Gandhi National
Centre for the Arts

॥ ३२ ॥ संधिविज्ञपत्नी सामतद्भवति सा मे वाहं संहितां मन्य इति तदप्येतदृषिणोक्तं बृहस्पतेन परः सा
म्नो विदुरिति स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण
लोकेन सर्वमायुरेति ॥ ५ ॥ बृहद्रथंतरयो रूपेण संहितां संधीयत इति तारुक्ष्यो वाग्वै रथंतर
स्य रूपं प्राणो बृहत उभाभ्यामु खलु संहितां संधीयते वाचा च प्राणेन चेति तस्या ह स्मो पु
निषदि संवत्सरं गारक्षयते तारुक्ष्य एतस्या ह स्म मात्रायां संवत्सरं गारक्षयते तारुक्ष्यस्त
दप्येतदृषिणोक्तं रथंतरमाजभारा वसिष्ठः । भरद्वाजो बृहदा चक्रे अग्नेरिति स य एवमे
तां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायु
रेति वाक्प्राणेन संहितेति कौंठरव्यः प्राणः पवमानेन पवमानो विश्वेदेवैर्विश्वेदेवाः
स्वर्गेण लोकेन स्वर्गो लोको ब्रह्मणा सैषावरपरा संहिता स यो हैतामवरपरां संहितां

वै २ ॥ ३२ ॥

वेदैवं हैव स प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन संधीयते यथैषा संहिता स यदि परेण
वोपस्तः स्वेन वार्थेनाभिव्याहरेदभिव्याहार्षेन्नेव विद्यादिवं संहितागमद्द्विषा देवानामेवं
भविष्यतीति शश्वत्थास्यात्स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्र
ह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति वाक्संहितेति पंचालचंडो वाग्वै वेदाः संधीयते वा चा ४
वाक्छंदांसि वाचा मित्राणि संदधति वाचा सर्वाणि भूतान्यथो वागेवेदं सर्वमिति तद्यत्रैतद
धीते वा भाषते वा वाचि तदा प्राणो भवति वाक्तदा प्राणं रेळ्ह्यथ यत्तूष्णीं वा भवति स्वपिति वा
प्राणे तदा वाग्भवति प्राणस्तदा वाचं रेळ्हि तावन्योन्यं रीळ्हो वाग्वै माता प्राणः पुत्रस्तदप्येत
दृषिणोक्तमेकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे तं पाकेन मनसापश्य
मन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरमिति स य एवमेतां संहितां वेद संधीयते प्रजया

Indira Gandhi National
Centre for the Arts

॥३२॥ पशुभिर्यशसाब्रह्मवर्च्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथातःप्रजापतिसंहिताजायापूर्वरू
पमित्युत्तररूपंपुत्रःसंधिःप्रजननंसंधानंसैषादितिःसंहितादितिर्हीदंसर्वंयदिदंकिंच
पिताचमाताचपुत्रश्चप्रजननंचतदप्येतदृषिणोक्तमदितिर्मातासपितासपुत्रइतिसय
एवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्व
मायुरेतिसर्वमायुरेति॥६॥इतिप्रथमोध्यायः॥प्राणोवंशइतिस्थविरःशाकल्यस्तद्यथाशा
लावंशेसर्वेन्येवंशाःसमाहितास्युरेवमस्मिन्प्राणेचक्षुःश्रोत्रंमनोवागिंद्रियाणिशरी
रंसर्वआत्मासमाहितस्तस्यैतस्यात्मनःप्राणऊष्मरूपमस्थीनिस्पर्शरूपंमज्जानस्व
ररूपंमांसंलोहितमित्येतदन्यच्चतुर्थमंतस्थारूपमितिहस्माहह्रस्वोमांडूकेयस्त्रयंत्वे
वनएतत्प्रोक्तंतस्यैतस्यत्रयस्यास्थिमज्ञांपर्वणामितित्रीणीतःषष्टिशतानित्रीणी ॥३३॥

तस्रानिसप्तविंशतिशतानिभवंतिसप्तचवैशतानिविंशतिश्चसंवत्सरस्याहोरात्राःसएषोहः
संमानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतमहःसंमानंच
क्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयमात्मानंवेदाह्नांसायुज्यंसरूपतांसलोकता
मश्नुतेपुत्रीपशुमान्भवतिसर्वमायुरेति॥७॥१॥अथकौठरव्यस्त्रीणिषष्टिशतान्यक्षराणां
त्रीणिषष्टिशतान्यूष्मणांत्रीणिषष्टिशतानिसंधीनांयान्यक्षराण्यवोचामाहानितानिया
नूष्मणोवोचामरात्रयस्तायान्संधीनवोचामाहोरात्राणांतेसंधयइत्यधिदैवतमथाध्या
त्मंयान्यक्षराण्यधिदैवतमवोचामास्थीनितान्यध्यात्मंयानूष्मणोधिदैवतमवोचाम
मज्जानस्तेध्यात्ममेषहवैसंप्रतिप्राणोयन्मज्जेतद्रेतोनहवाऋतेप्राणाद्रेतःसिच्यते
यद्वाऋतेप्राणाद्रेतःसिच्येतपूयेन्नसंभवेद्यान्संधीनधिदैवतमवोचामपर्वाणितां

Indira Gandhi National Centre for the Arts

॥३४॥ न्यध्यासं तस्यैतस्य त्रयस्यास्थ्नां मज्ञां पर्वणामिति पंचेतश्चत्वारिंशच्छतानि पंचेतस्त्तदशी
तिसहस्रं भवत्यशीतिसहस्रं वा अर्कलिनो बृहतीरहरभिसंपादयंति स एषोऽक्षरसमाने
चक्षुर्मयः श्रोत्रमयश्छंदोमयो मनोमयो वाङ्मय आत्मा स य एवमेतमक्षरसमानं च
क्षुर्मयं श्रोत्रमयं छंदोमयं मनोमयं वाङ्मयमात्मानं वेदाक्षराणां सायुज्यं सरूपतां स
लोकतामश्नुते पुत्री पशुमान्भवति सर्वमायुरेति ॥५॥ चत्वारः पुरुषा इति बाध्वः शरी
रपुरुषश्छंदः पुरुषो वेदपुरुषो महापुरुष इति शरीरपुरुष इति यमवोचाम स य एवायं
देहिक आत्मा तस्य योऽयमशारीरः प्रज्ञात्मा स रसश्छंदः पुरुष इति यमवोचाम येन वे
दान्वेद ऋग्वेदं यजुर्वेदं सामवेदं तस्यैतस्य ब्रह्मा रसस्तस्माद्ब्रह्माणं ब्रह्मिष्ठं कुर्वीत यो
यज्ञस्योल्बणं पश्येद्य महापुरुष इति यमवोचाम संवत्सर एव प्रध्वंसयन्नन्यानि भूता
माक्षरसमाम्नाय एव तस्यैतस्याकारो रसो वेदपुरुष इति यमवोचाम ३ ॥३४॥

न्यैक्याभावयन्नन्यानि तस्यैतस्यासावादित्यो रसः स यश्चायमशरीरः प्रज्ञात्मा यश्चासा
वादित्य एकमेतदिति विद्यात्तस्मात्पुरुषंपुरुषं प्रत्यादित्यो भवतीति तदप्येतदृषिणोक्तं चित्रं
देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृथिवी अंतरिक्षं सू
र्य आत्मा जगतस्तस्थुषश्चेत्येतामनुविधं संहितां संधीयमानां मन्य इति ह स्माह बाध्व
एतं ह्येव बह्वृचा महत्युक्थे मीमांसंत एतमग्नावध्वर्यव एतं महाव्रते छंदोगा एतमस्यामे
तं दिव्येतं वायावेतमाकाश एतमप्स्वेतमोषधीष्वेतं वनस्पतिष्वेतं चंद्रमस्येतं नक्षत्रेष्वेतं
सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते स एष संवत्सरसमानश्चक्षुर्मयः श्रोत्रमयश्छंदो
मयो मनोमयो वाङ्मय आत्मा स य एवमेतं संवत्सरसमानं चक्षुर्मयं श्रोत्रमयं छंदोम
यं मनोमयं वाङ्मयमात्मानं परस्मै शंसति ॥६॥ दुग्धदोहा अस्य वेदा भवंति न तस्या

Indira Gandhi National Centre for the Arts

॥३५॥ नूके भागोस्ति नवेद सुकृतस्य पंथानमिति तदप्येतदृषिणोक्तं यस्तित्याज सचिविदं सखायं
नतस्य वाच्यपि भागो अस्ति। यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पंथामि
तिन तस्या नूके भागोस्ति नवेद सुकृतस्य पथानमित्येतन्नदुक्तं भवतीतस्मादेवंविद्वा
न परस्मा अग्निं चिनुयान्न परस्मै महाव्रतेन स्तुवीत न परस्मा एतदहः शंसेत्कामं
पित्रे वाचार्याय वा शंसेदात्मन एवास्य तत्कृतं भवति स य श्चायमशरीरः प्रज्ञात्मा य
०४ श्चासावादित्य एकमेतदित्यवोचाम तौ यत्र विहीयेते चंद्रमा इवादित्यो दृश्यते न रश्मयः
प्रादुर्भवंति लोहिनी द्यौर्भवति यथा मंजिष्ठा व्यस्तः पायुः काककुलाय गंधिकमस्य
शिरो वायति संपरेतोस्यात्मा न चिरमिव जीविष्यतीति विद्यात्स यत्करणीयं मन्येत
तत्कुर्वीत यदंति यच्च दूरक इति सप्त जपेदादित्स्व लस्य रेतस इत्येकायत्र ब्रेलापवमाने ॥३५॥

शिरसंवार

तिषच्छुद्धयंतमसस्परीत्येकाथापि यत्र कुड्य इवादित्यो दृश्यते रथनाभिरिवाभिख्यायेताछि
द्रां वा छायां पश्येत्तदप्येवमेव विद्यादथाप्यादर्शे वोदके वा जिह्मशिरसं वात्मानं पश्येद्वि
पर्यस्ते वा कन्यके जिह्मे न वा दृश्येयातां तदप्येवमेव विद्यादथाप्यपिधायाक्षिणी उप
क्षेतत यथा बुटरकाणि संपतंतीव दृश्यते तानि यदा न पश्येत्तदप्येवमेव विद्यादथाप्य
पिधाय कर्णावुपशृणुयात्स एषोग्नेरिव प्रज्वलतो रथस्येवोपब्दिस्तं यदा न शृणुयात्तद
प्येवमेव विद्यादथापि यत्र नील इवाग्निर्दृश्यते यथा मयूरग्रीवा मेघे वा विद्युतं पश्येन्मे
घे वा विद्युतं न पश्येन्महामेघे वा मरीचीरिव पश्येत्तदप्येवमेव विद्यादथापि यत्र भूमिं
ज्वलंतीमिव पश्येत्तदप्येवमेव विद्यादिति प्रत्यक्षदर्शनान्यथ स्वप्नाः पुरुषं कृष्णं केश
दंतं पश्यति स एनं हंति वराह एनं हंति मर्कट एनमास्कंदयत्याशु वायुरेनं प्रवहति

Indira Gandhi National
Centre for the Arts

॥३६॥

सुवर्णं रवादित्यापगिरति मध्वश्नाति बिसानि भक्षयत्येकपुंडरीकं धारयति खरैर्वराहैर्युक्तै
र्याति रुक्मी धेनुं रुक्मवत्सां नल्वदमाली दक्षिणामुखो भ्राजयति स य एतेषां किंचिद्विसंश्ये
दुपोष्य पायसं स्थालीपाकं श्रपयित्वा रात्रीसूक्तेन प्रस्तुत्य चैत्वान्येनान्नेन ब्राह्मणा
न्भोजयित्वा चरुं स्वयं प्राश्नीयात् स यो ता श्रुतो गेतो मतो नेतो दृष्टो विज्ञातो नादिष्टः श्रोता
मंता द्रष्टा देष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामंतरपुरुषः स म आत्मेति विद्यात् ॥११
॥७॥ अथ खल्वियं सर्वस्यै वाच उपनिषत्सर्वा ह्येवेमाः सर्वस्यै वाच उपनिषद इमां त्वे
वाचक्षते पृथिव्या रूपं स्पर्शा अंतरिक्षस्योष्मा रोदिवः स्वरा अग्ने रूपं स्पर्शा वायोरू
ष्माणः सामवेदस्य स्वराश्चक्षुषो रूपं स्पर्शाः श्रोत्रस्योष्माणो मनसः स्वराः प्राणस्य
रूपं स्पर्शा अपानस्योष्माणो व्यानस्य स्वरा अथ खल्वियं दैवी वीणा भवति तदनुकृ
त आदित्यस्य स्वरा ऋग्वेदस्य रूपं स्पर्शा यजुर्वेदस्योष्मा २ ॥३६॥

तिरसौ मानुषी वीणा भवति यथास्याः शिर एवममुष्याः शिरो यथास्या उदरमेवममुष्या अंभणं यथास्यै
जिह्वैवममुष्यै वादनं यथास्यास्तंत्रय एवममुष्या अंगुलयो यथास्याः स्वरा एवममुष्याः स्वरा यथास्या
स्पर्शा एवममुष्याः स्पर्शा यथा ह्येवेयं शब्दवती तर्द्मवत्येवमसौ शब्दवती तर्द्मवती यथा ह्येवेयं लोम
शेन चर्मणापिहिता भवत्येवमसौ लोमशेन चर्मणा पिहिता लोमशेन ह स्म वै चर्मणा पुरा वीणा अ
पिदधति स यो हैतां दैवीं वीणां वेद श्रुतवदनो भवति भूमिप्रास्य कीर्तिर्भवति यत्र क्व चार्या वाचो भा
षंते विदुरेनं तत्राथातो वाग्रसो य स्यां संसद्धीयानो वा भाषमाणो वा न विरुरुत्सुषेत तद्वैतां मे
चं जपेदोष्ठापिधाना नकुली दंतैः परिवृता पविः ॥ सर्वस्यै वाच ईशाना चारु मामिह वादयेदिति
वाग्रसः ॥१२॥८॥ अथ हास्मा एतत् स्म हारितो वाग्ब्राह्मणमिवोपोदाहरति प्रजापतिः प्रजाः स्
ष्ट्वा व्यस्रंसत संवत्सरः स छंदोभि रात्मानं समदधाद्यच्छंदोभि रात्मानं समदधात्तस्मात्संहि

Indira Gandhi National Centre for the Arts

॥३७॥ तातस्यैवाएतस्यैसंहितायैणकारोबलंषकारःप्राणआत्मासयोहैतौणकारषकारावनुसंहितमृचोवे
दसबलांसप्राणांसंहितांवेदायुष्यमितिविद्यात्सयदिविचिकित्सेत्सणकारंब्रवाणी३ँ।अणकारा३
इति।सणकारमेवब्रूयात्सषकारंब्रवाणी३ँ।अषकारा३इति।सषकारमेवब्रूयात्तेयद्वयमनुसंहित
मृचोधीमहेयच्चमांडूकेयीयमध्यायंप्रब्रूमस्तेननोणकारषकारावुपाप्तावितिहस्माहह्रस्वो
मांडूकेयोथयद्वयमनुसंहितमृचोधीमहेयच्चमांडूकेयीयमध्यायंप्रब्रूमस्तेननोणकारषकारा
उपाप्तावितिहस्माहस्थविरःशाकल्यएतद्धस्मवैतद्विद्वांसआहुर्ऋषयःकावषेयाःकिमर्था
वयमध्येष्यामहेकिमर्थावयंयक्ष्यामहेवाचिहिप्राणंजुहुमःप्राणेवावाचंयोह्येवप्रभवः
सएवाप्ययस्ताएताःसंहितानानंतेवासिनेप्रब्रूयान्नासंवत्सरवासिनेनाप्रवक्त्रइत्याचा
र्यआचार्याः॥२२॥६॥ इतिद्वितीयोध्यायः॥ इतितृतीयारण्यकंसमाप्तं॥ विदामघवन्विदा ॥३७॥

गातुमनुशंसिषोदिशः।शिक्षाशचीनांपतेपूर्वीणांपुरूवसो।आभिष्टुमभिष्टिभिःप्रचेतनप्रचेतय।इंद्रद्यु
म्नायनइषएवाहिशक्रः।रायेवाजायवज्रिवःशविष्ठवज्रिन्नृंजसे।मंहिष्ठवज्रिन्नृंजसआयाहिपि
बमत्स्व।विदारायःसुवीर्यंभुवोवाजानांपतिर्वशाँअनु।मंहिष्ठवज्रिन्नृंजसेयःशविष्ठःशूराणां॥यो
मंहिष्ठोमघोनांचिकित्वोअभिनोनय।इंद्रोविदेतमुस्तुषेवशीहिशक्रः।तमूतयेहवामहेजेतारमप
राजितं।सनःपर्षदतिद्विषःक्रतुश्छंदऋतंबृहत्।इंद्रधनस्यसातयेहवामहेजेतारमपराजितं।स
नःपर्षदतिद्विषःसनःपर्षदतिस्रिधः।पूर्वस्ययत्तेअद्रिवःसुम्नआधेहिनोवसोपूर्तिःशविष्ठश
स्यतईशेहिशक्रः।नूनंतेनव्यसन्यसेप्रभोजनस्यवृत्रहन्।समन्येषुब्रवावहैशूरोयोगोषु
गच्छतिसखासुशेवोअद्वयाः।एवाह्येवेवाह्यग्ना३इ।एवाह्येवेवाहीद्रं।एवाह्येवेवाहिविष्णा३उ।
एवाह्येवेवाहिपूषन्।एवाह्येवेवाहिदेवाः।एवाहिशक्रोवशीहिशक्रोवशाँअनु।आयोमन्या

Indira Gandhi National Centre for the Arts

॥३८॥

यमन्यवउपोमन्यायमन्यवे।उपेहिविश्वध।विदामघवन्विद्दोमं॥१॥इतिचतुर्थारण्यकं समाप्तं॥छ॥
महाव्रतस्यपंचविंशतिंसामिधेन्यएकविंशतोप्रागुपोत्तमायाःसमिधाग्निमितिचतस्त्रोवैश्वक
र्मणऋषभउपालंभनीयउपांश्वाज्यप्रउगेविश्वजितोहोत्राश्चतुर्विंशादीरवयंतीरपस्युवइति
चब्राह्मणाछंस्यावपेतप्रातःसवनेतीव्रस्याभिवयसोअस्यपाहीतिमाध्यंदिनेत्रिकद्रुकेषुमहि
षोयवाशिरमितिस्तोत्रियएंद्रयात्सुपनःपरावतइंद्रायहिद्योरसुरोअनम्नत।प्राघस्मैपुरोर
थमित्यतोनुरूपश्चतुर्विंशान्मरुत्वतीयस्यातानोसत्सुमेजरितःसाभिवेगःपिबासोममभि
यमुग्रतर्दःकयाशुभासवयसःसनीलामरुत्वांइंद्रवृषभोरणायजनिष्ठाउग्रःसहसे
तुरायेतिमरुत्वतीयसंस्थितेमरुत्वतीयेहोताविसंस्थितसंचरेणनिष्क्रम्याग्नीध्रीयेतिस्त्रआ
ज्याहुतीर्जुहोत्योदुंबरेणस्त्रुवेणानुमामिंद्रोअनुमांबृहस्पतिरनुसोमोअनुवाग्देव्यावीत्॥ ॥३८॥

अनुमांमित्रावरुणाविहावतामनुद्यावापृथिवीपूर्वहूतो।आदित्यामाविश्वेअवंतुदेवाःसम्राजानोयुउ
दाभिषिक्ताः।वायुःपूषावरुणःसोमोअग्निःसूर्योनक्षत्रैरवतिहमानु।पितरोमाविश्वमिदंचभूतंपृथ्वि ते० ३
मातरोमरुतस्वर्काः।येअग्निजिह्वाऋतवायजत्रास्तेनोदेवाःसुहवाःशर्मयछंतेतिदक्षिमाजो
लीयेदशस्रुच्युत्तमांचतुर्गृहीतंपूर्वमवदायोत्तरतोग्नेरुपनिधायविहरणप्रभृतिमध्यंदिने
मार्जालीयोजागरितोभवतितस्मिन्परिवृतेजुहोतिप्राग्द्वारेवोदग्द्वारेवाप्रागुदग्द्वारेवाग्नि
रिवानाधृष्यःपृथिवीवसुषदाभूयासमंतरिक्षमिवानाप्यंद्यौरिवानाधृष्योभूयासंसूर्यइवा
प्रतिधृष्यश्चंद्रमाइवपुनर्भूर्भूयासंमनइवापूर्ववायुरिवश्लोककृद्भूयासमहरिवस्वंरात्रिरि
वप्रियोभूयासंगावइवपुनर्भुवोमिथुनमिवमरीचयोभूयासमापइवरसऔषधयइवरूपंभूया
समन्नमिवविभुयज्ञइवप्रभूर्भूयासंब्रह्मेवलोकेक्षत्रमिवश्रियाभूयासंयदग्नएषासमिति

Indira Gandhi National
Centre for the Arts

॥३९॥

र्भवा तीत्यत्रवि मन्त्राथ वीथेति त्रीण्यनन्त्व चमत्रतिष्ठं नादित्यमुपतिष्ठते पर्यावृत्तेप्रदक्षिणमा
वृत्येते श्रौबा३स्वा हा कारेरेहेयेवा३इदंम धु३इदंम धु। इमंतीव्रसुतंपिबा३इदंम धु३इदंम ध्विति च
प्रेष्या: संशास्ति पूर्णकुंभास्तिस्रोव मा:षल्कुत्तमाइमंधिष्ण्यमुदकुंभं चत्रि:प्रदक्षिणपरिव्रज्ज्या
थदक्षिणे:पाणिभिर्दक्षिणानूरूनाघ्नानाए हेयेवा३इदंम धु३इदंम ध्वितिवदत्य॥२॥ उपाकृ
ते स्तोत्रे त्रेधं न्निनयाथात्रोत्तरेच मार्ज्जालीये शेषमेतवेदीं तिप्रदक्षिणमग्निं निष्क्रम्याग्रेण
यूपंपुरस्तात्प्रत्यङ्मुखस्तिष्ठन्त्वग्ने:शिर उ पतिष्ठते नमस्तेगायत्रायचत्ते शिरइति तेनैवय
थेतं प्रत्येत्य दक्षिण मुदङ्मुख:पक्षन्नमस्ते राथंतराययस्ते दक्षिण:पक्षइत्यपरेणाग्निपु
च्छमतिक्रम्य प्राङ्मुखउत्तरं नमस्ते बृहतेयस्तउत्तर:पक्षइति पश्चात्प्राङ्पुच्छं नमस्तेमद्राय य
त्ते पुच्छं यातेप्रतिष्ठेति दक्षित:पुच्छस्यात्मानं मनस्ते राज्ञनाययस्त आत्मेति॥२॥यथेतंसद:

णा१

॥३९॥

प्रसर्पति पुरस्तात्प्रेंखउपक्लृप्तो भवति स्थूणोरज्जूवीबध इत्येतत्प्रश्चाल्यती र्थेनप्रपाद्योत्तरेणाग्नीध्रीयं
परिव्रज्य पूर्वयाद्वारासद:सर्वोधिष्ण्यानुत्तरेणौदुंबराणि काष्ठानि प्रेंखस्य भवंति पाल्लाशानिमिश्रा
णिवात्रीणि फल कान्युभयतस्तष्टानि द्वेवासूच्यश्चलाव त्यइषुमात्र:प्राङ् प्रेंखोनिमुष्टिक:स्तिर्य
ङुदगग्र:प्रागग्राभ्यां सूचीभ्यां समुतोदक्षिणोत्तरे स्थूणेनिखायाभितो होतृषदनं वीवधमस्या
दधात्या॥ स्यसंमितं कर्तु:कुशासुक्ष्णिदाणि प्रेंखस्य भवंतिरज्जूभ्यामूर्ध्वमुदयति दक्षिणतो
दक्षिणयोत्तरत:सव्ययाद्वाभ्यांत्रिगुणेस्यातांसव्यदक्षिणेपंचव्यायामेद्विगुणेवीवधेत्रि:प्रदक्षिणं
पर्यस्योर्ध्वग्रंथिं न्निष्टर्कंबध्नाति शाखाभिर्वे सीभिर्वापर्यषंत्यप्रकं पि चतुरंगुलेनैषविभूम:
प्रेंखस्यान्मुष्टिमात्रेणवादक्षिणतउदाहिततर:समोवापदमात्रे धिष्ण्यात्॥३॥निष्ठिते प्रेंखे
होताबाणमौदुंबरंशततंतुमुभाभ्यांपरिमृस्योत्तरतउपोहते यथावीणासम्प्रभिश्छंदोनिश्व

Indira Gandhi National Centre for the Arts

क्र. ला. ३

॥४०॥ तुरुत्तरे स्थानान्यस्योर्ध्वमु याद्दशाभिर्वा गायत्रेण त्वा छंदसोदूहाम्योल्लिहेन त्वानुष्टुभेन
त्वा बार्हतेन त्वा पाङ्क्तेन त्वा त्रैष्टुभेन त्वा जागतेन त्वा वैराजेन त्वा द्वैपदेन त्वाति छंदसा त्वेति छंदां
स्यनुक्रम्य स्थानानोमनुपरिक्रमणमोदुंबर्याद्यशाखया सपलाशया मूलदेशेन चाणत्रिरूर्ध्व
मुल्लिखति प्राणाय त्वापानाय त्वा व्यानाय त्वोल्लिखामी त्यन्येभ्योपि कामेभ्यः पुनरपि त्वो
ल्लिखामी तिब्रूयादथैनं स शाखं कदोगेभ्यः प्रयछति भूतेभ्यस्त्वेति पश्चाद्दैफलके पाणी
प्रतिष्ठापयति प्राणमनुप्रेखस्वेति प्राचं प्रेरवं प्रणयति व्यानमनुवीखस्वेतिति तिर्यंचमपानम
न्वीखस्वेत्य भ्यासं भूर्भुवः स्वरितिजपति प्राणाय त्वेति प्राचमेव व्यानाय त्वेतिति तिर्यंचमपा
नाय त्वेत्य भ्यासमेवसवस्त्वा गायत्रेण छंदसारोहं तु तानन्वारोहामीति पश्चाद्दैफलके र
त्नीप्रतिष्ठापयत्यथ पूर्वं फलकं नाना पाणिभ्यामभिप तयथाहि स्व स्यन्म ध्यमं कुबु ॥४०॥

घो १

॥

केनोपस्थ शोद्वयोर्वा संधिं रुद्रास्त्वा त्रैष्टुभेन छंदसारोहं तु तानन्वारोहामीति दक्षिणं सक्थ्यतिहरत्यादित्या
स्त्वा जागतेन छंदसारोहं तु तानन्वारोहामीति सव्यं विश्वेत्वा देवा आनुष्टुभेन छंदसारोहं तु तानन्वारो
हामीति समारोहति पश्चात्त्वस्य धिष्ण्यस्य दक्षिणं पादं प्राचं प्रतिष्ठापयत्य थ सव्यं यदेतरश्चाम्येद थेत
रं यदेतरो थेतरं नो भो विभूमो कुर्यात्कूर्चा न्हो त्रकाः समारोहं तिब्रह्मा चोदुंबरीमासंदीमुद्गाताय
द्दिक स्मे चिद्वत्स्य कर्मणि जिगमिषेद्दादिश्य पालं प्राङ्वरुह्य च रित्वा तमर्थमेवमेवाज्यपयावृता
रोहेत्॥४॥ प्रस्तोतारं संशास्ति पंचविंशस्य स्तोमस्य तिस्र षड्त्तती या स्वर्द्द त्रयोदशासु वा परिशि
ष्टासु प्रथमं प्रतिहारं प्रभूतादि त्यद्द त्रयोदशासु प्रवाचयते ति जातूक र्ण्यः प्रात्के जपति सुप
र्णोसि गरुत्मान्त्रे मां वाचं वदिष्यामि बहु वदिष्यंती बहु पतिष्यंती बहु करिष्यंती बहु सनिष्यं
ती बहो र्भूयः करिष्यंती स्वर्गछंती स्वर्वदिष्यंती स्वः पतिष्यंती स्वः करिष्यंती स्वः सनिष्यं

Indira Gandhi National Centre for the Arts

तीस्वरिमंयज्ञंवक्ष्यंतीस्वर्मोयजमानंवक्ष्यंतीमितिदीक्षितेयजमानशब्दोनादीक्षितेस्वरमुमि
तियोस्यप्रियस्यांनतुवक्ष्यंतीमितिब्रूयादुक्थवीर्याणिचसंप्राणोवाचासमहंवावासंचक्षुर्म
नसासमहंमनसासंश्रोत्रमात्मनासमहमात्म नामयिमहोयिभर्गोमयिभगोमयिमु
जोमयिस्तोमोमयिस्तोमोमयिश्लोकोमयिघोषोमयियशोमयिश्रीर्मयिकीर्तिर्मयिमुक्तिरि
त्याहुयवागितिजपतित्रयज्ञाहावाःशस्त्रादेर्निविदःपरिधानीयायाइतिशब्दानध्वर्यवःका
रयंत्येतस्मिन्नहनिप्रभूतमन्नंदद्याद्राजपुत्रेणचर्मव्याधयंत्याघ्नंतिभूमिदुंदुभिंपत्न्यश्च
कांडवीणाभूतानांचमैथुनंब्रह्मचारिपुंश्चल्योःसंप्रवादोनेकेनसाम्नानिष्केवल्याय
स्तंवतेराजनस्तोत्रियेणप्रतिपद्यते॥५॥तदिदासभुवनेषुज्येष्ठंतांसुतेकीर्तिंमघवन्मम
हित्वाभूयइद्वावृधेवीर्यायन्नूणामुत्वान्नतमंगीर्भिरुक्थैरितितिस्रोत्रहेकेस्वादोस्वादी ॥४२॥

यस्वादुनास्वज्ञासमदःसुमधुमधुनाभियोधीरित्यात्मन[illegible]देउद्धस्यपक्षपदेप्रस्वदधास्यभ्वायं
तोमघवन्निंद्रवाजिनोगामश्वंरथ्यमिंदसंकिरस्येतदोश्वस्थानइतरेत्रियमहगोरश्ममात्मेधे
तोसंपक्षयोःपतनायनदेंवऽऊंदतीनामित्येतयेतानिव्यतिषजतिपादैःपादान्बृहतीकारं
नदेवंत्त्युत्तराणिप्रथमायांचतुरुषाक्षराण्युपदधातिपादेष्वेकैकमवसानेतृतीयवर्ज्जंसरत
लुविहरत्यपिनिदर्शनायोदाहरिष्यामःतदिदासभुवनेषुज्येष्ठंपु।नदेवओदतीनां।यतो
जज्ञउग्रस्त्वेषनृम्णोरु।नदंयोयुवतीनां३।सद्योजज्ञानोनिरिणातिशत्रून्यतिंवोअ
घ्न्यानां३।अनुयंविश्वेमदंत्यूमाःषोधेनूनाभिषुध्यसोमिस्येवमेतांजिरन्यासुचेत्सामा
म्नातासुराजनेनसाम्नास्तुवीरन्यथास्थानंताइहैवमाअसमाम्नातासुचेत्स्तुवीरन्स
माम्नातस्यतावतीरुद्धत्यतेत्रताःशंसेदिहोएवेमाअन्यासुचेत्स्वाक्सूददोहसः स्तो

Indira Gandhi National
Centre for the Arts

स्तादिद्दासेस्येतद्दादिशास्त्रमविहतश्चात्रप्रतिगरस्ता॥अस्य सूददोहसइत्येतद्दादिः सूददोहाः सू-
ददोहाः॥६॥ प्रथमोध्यायः॥ ग्रीवाः॥३॥ यस्येदमारजस्तुजोयुजोवनं सहः॥ इंद्रस्यरंत्यंबृहत्॥
नाधृषआदधर्षदाधृषाणंधृषितंशवः॥ पुरायदीमतिव्यथिरिंद्रस्य धृषितंसहः॥ सनोददा
तुतंरयिंरयिंपिशंगसंदृशं॥ इंद्रः पतिस्तवस्तमोजनेष्वा सूददोहाः॥ शिरोगायत्रमिंद्रमिद्गा
थिनोबृहदित्यन्यासु चेत्समाम्नातासु स्तुवीरं नु भयासंस्कानविपर्ययोसमाम्नातासु
वेत्स्तुवीरन्मिश्रासु च सूक्तस्योत्तमा सूददोहा॥ विजवः॥ सुतस्तेसोमउपयाहियत्नेम
त्वामदंसुरुवारंमघायामेहिष्ठइंद्र॥ विजुरोगणध्योसमाहतुर्वेत्रहस्तेषु शाचूर्न्दे
विगाहएषः॥ सनोनेतारंमहयामइंद्रं॥ इनोवसुसमजः पर्वतेष्ठाः प्रतिवाम्नजीषी॥
इंद्रः शश्चद्विजोहृत्रएवेः॥ सूददोहाइत्येतत्रयंग्रीवाः॥ शिरोविजवः सर्वमद्व्यं ७ ॥८२॥

भयंयन्नसमृद्धिमेयुष्वेगिवाचयुसध्वर्युमब्रुद्धेवेदस्य भवत्योमुक्थशा॥ यज सोमस्येतीज्या
येसंप्रेषितोयेयजामहइत्यागूर्यनिस्येयेवयजतिव्यवान्येवानुवषट्करोत्युक्तेवषट्कारा
नुमंत्रणमाहरत्यध्वर्युरुक्थपात्रमतिग्राह्यो॥ श्वमसोश्वभक्षंप्रतिख्यायहोतापाडुपेरवा
हवरोहत्यथैतंप्रेरवंप्रत्यचमवबध्नीतियथाशासितारं भक्षयिष्यंतनोपहन्निष्यसीतिप्रेरवस्य
त्यायतनउनासीनोहोताभक्षयत्यथैतदुक्थपात्रं होतोपस्पृष्टनजपनभक्षयतिवागिंद्र
वीसो मस्यतृप्यतु॥ सोमोमेराजायुः प्राणायवर्षतु॥ समेप्राणः सर्वमायुर्दुहामहादित्यु
मा ३ तेंद्राभिहृ विकाच्छतीयसवनमन्यदेश्वदेवान्निविद्वानादस्यवामस्यपलितस्यहोतु
रितिसलिलस्यदेर्घ तमसएकचत्वारिंशतमानोभद्रीयंचतस्यस्थानएकाहिकोवै
श्वदेवस्यप्रतिपदनुचरौव्येतचेघद्नायज्ञीयमग्नेतवश्रवोवयइतिषट्स्तोत्रियानु

Indira Gandhi National Centre for the Arts

॥८६॥

रूपौ यदीन्द्रं भूयसीषु वेत्तु वीरं नाग्निं चस्वदृक्षिभिरिति तावाशीरनुरूपः संपन्नं महा
व्रतं संतिष्ठत इदं महदग्निष्टोमो यथाकालमेव भक्षं प्रेरवं हरेयुः संदहेयुर्वै
सीः॥२३॥ ना दीक्षि तो महाव्रतं शंसेन्नानग्नो न परस्मै नासंवत्सर इत्येके कामं पित्रे वा
चार्याय वा शंसेदात्मनो हैवास्य तत्कृतं भवति होता शंसेच्चेदुक्थशायजसोम इत्येके प्रैषः
स नाराशंसेषु नाराशंसेषु वा होत्रकाणामुक्थशायजसोमानामिति तदिदं महन्नानं तेवा
सिने प्रब्रूयान्नासंवत्सरवासिने नो एवासंवत्सरवासिने नाब्रह्मचारिणे नासब्रह्मचारिणे
तं ३ नो एवासब्रह्मचारिणे नानभिप्रायायैदेशं न भूयः सत्कृदन्नादिगदन्नाद्द्ध्येव एक
एकस्मै प्रब्रूयादिति ह स्माह जातूकर्ण्यो न वत्सेच न तलीय इति न तिष्ठन्स्ति ष्ठते न व्रजन्व्र
जते न शयानः शयानाय नोपर्यासीन उपर्यासीनाय नाध एवासीनो धआसीनाय नाव ॥८६॥

ष्ठ्यो न प्रतिरुब्धो नातिवीतो नावकृत्तो ऊर्ध्वज्ञुरनपश्रितो धीयीत न मांसं भुक्त्वा न लोहितं दृष्ट्वा
न गता सुं नाप्रसमाक्रम्य नाक्तो नाभ्यज्य नो न्मर्दनं कारयित्वा न नापितेन कारयित्वा न स्ना
त्वा न वर्णकेनानुलिप्य न स्त्रजमपिनह्य न स्त्रियमुपगम्य नो ल्लिख्य नावलिख्य नेदमेक
स्मिन्नहनि समापयेदिति ह स्माह जातूकर्ण्यः समापयेदिति गालवो यदन्यत्स्वाक्कृ चाशीति
न्यः समापयेद्वैयाग्निवेश्यायनो न्यमन्यस्मिन्देशे शमयमान इति यत्रेदमधीयीत न त
त्रान्यदधीयीत य त्रान्यदधीयीत काममिदं तत्राधीयीत नेदमनधीयन्स्नातको भवति य
द्यप्यन्यद्बहु धीयान्नैवेदमनधीयन्स्नातको भवति नास्मादधीतात्प्रमाद्येद्यद्यप्यन्यस्मा
त्प्रमाद्येन्नैवास्मात्प्रमाद्येन्नो एवास्मात्प्रमाद्येदस्माच्चेत्प्रमाद्येदलमात्मन इति विद्याद
न्तेसत्यं विद्यान्नेदं विदन्निदं विदासमुद्दिशेन्न सह भुञ्जीत न सधमादी स्यादथ तस्याध्या

Indira Gandhi National Centre for the Arts

॥ ४७॥

३१५२४

य धर्मं व्याख्यास्याम उपपुराणो नापीतेव क्षोदके पूर्वाह्लेन संभिंनासु छायास्वपराह्णे नाध्यूर्ध्वं
मेघेपतौ वर्षे त्रिरात्रं वैदिकेनाध्याये नांतरियं नास्मिन् कथां वदेत नास्यराजौ च नकीर्त्ते
यिषेत्तादिति वा एतस्य महतो भूतस्य नाम भवति यो स्यैतदेवं न्मानवेद ब्रह्म भवति ब्रह्म भ
वति ॥२४॥ तृतीयो ध्यायः ॥ इति पंचमार पयकेसमाप्तं ॥ श्रीरामजयरामजयजयरामा ॥ अग्नि
होत्र : ॥ संवत् १७९६ शाके १६७० मितीज्येष्ठ कृष्ण ३ भोमवासरे तद्दिने लिखितं ज्ञा
मूदग्निवत्स गोत्री ० उपासनो पाख्य प्रहराद भट्ट स्य दत्तोस सह ऋषि नामे श्री रामार
पण मस्तु श्री कृष्णार्पण मस्तु श्री गोपाल्ह श्री गोविंद श्री राम श्री कृष्ण श्री वासुदेव

॥ ४७॥

Indira Gandhi National
Centre for the Arts